1639

इतिहास
90

23 A

વીરધર્મ
પટ્ટાવલી

158

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

वीरधर्मपट्टावलिः

—मंगलविजयः

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

॥ अर्हम् ॥

श्री नमो नमः श्री प्रभुधर्मसूरये

श्री वीरधर्म पट्टावलि

卐

कर्ता—

न्याय-विशारद न्याय-तीर्थ उपाध्याय श्री

श्री मङ्गलविजयजी महाराज

प्रकाशक :—

हेमचन्द सवचन्द शाह

कलकत्ता

प्रथमावृत्तिः

२५०

वीर सं० २४६६ धर्म सं० १८ वि० सं० १९९६

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

मुद्रक—
कृष्णगोपाल केडिया
वणिक प्रेस
१, सरकार लेन, कलकत्ता।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

शुद्धि-पत्रक

अशुद्ध	शुद्ध	पृष्ठ	पंक्ति
ज	जम्	[illegible]७	७
ता	ताम्	७७१	११
तौ	तो	७७३	१
द्र	द्रे	७७३	१३
र्यां	र्ये	७७५	७
ल्ल	ल्लं	५७५	७
ति	तिं	५८०	१०
न	ना	५८५	५
सूरीणांच	सूरयश्च	६१०	५
तः	ताः	६१०	५
सरि	सूरि	६१३	४
तः	ताः	६१५	३
तु	न्तु	७०१	१
ने नैव	नेनैव	७०२	७
तां	यां	७०५	३
मकम्	पदम्	७०८	५
कः	काः	७११	६
नैव	चैव	७१५	१७
न	व	७१६	१७
निं	नीं	७१७	३
याग	योग	७२७	३

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

॥ नमो नमः श्री प्रभुधर्मसूरये ॥

वीरधर्मपट्टावलिः ।

योगप्रदीपस्य प्रशस्तिः ।

वन्दे-शासननायकं जिनपतिं वीरं सिद्धार्थात्मज
द्वादशवर्षमितं तपश्च विहितं येनैव घोरं महत् ॥
उपसर्गादिककष्टसोढशक्तं ध्यानाप्तकैवल्यकं
पावापुरिस्थितमनन्तसुखदं, श्रीवर्धमानं स्तुवे ॥१॥

मिथ्यात्वतैमिरतया च व्याप्तम्
यदीयस्वान्तमज्ञानदोषतः ।
श्रीवीरभानूदयेनैव नष्टम्
पावानगर्यां यजनक्षणे तत् ॥२॥

श्रीवर्धमानात्त्रिपदीमवाप्य
दृब्धं परिपूर्णश्रुतं च येन ।
श्रीद्वादशांगित्वरूपात्प्रसिद्धम्
तमिन्द्रभूतिं शतशो नमामः ॥३॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

तस्यैव यादृशी भक्तिः, निःसीमा जगतां गुरौ ।
तल्लेशो मादृशां स्याच्चेत्तदैव सफलं जनु ॥४॥
मानोऽपि रत्नलाभाय, सद्रागः प्रभुभक्तये ।
खेदः कैवल्यज्ञानाय, सर्वं चित्रं गुरो तव ॥५॥
अल्पायुष्कत्वहेतोश्च, अन्येषां गणधारिणाम् ।
भगवत्पट्टयोग्यत्वं, नैव तेषां प्रकीर्त्तितम् ॥६॥
सुधर्मस्वामिनां किन्तु, स्वपट्टत्वं समर्पितम् ।
तदादिशिष्यसम्पत्तिः, तेषामेव विभाव्यते ॥७॥
विचरन्त्यधुना ये च, ते सर्वे साधवः किल ।
सुधर्मस्वामिनां शिष्याः, ज्ञातव्या सर्वसज्जनैः ॥८
श्रीवीरात्त्रिपदीमवाप्य रचना पूर्वस्य पूर्वं कृता
सल्लब्धिं परिप्राप्य नैव मनसि दर्पाङ्कुरो रोपितः ।
सर्वज्ञ सदृग्यदीय शुद्धशिक्षां गृह्णाति संघः सदा
तद्धर्मेण सुवासितं च भरतं जीयात्सुधर्माग्रणीः ॥६
प्रभुश्रीवीरदेवानां, पट्टो येन विभूषितः ।
स सुधर्मा गणी सर्वकल्याणकारको भवेत् ॥१०॥
कोटिं नवनवतिं विहाय हेम्नामष्टौ च प्रियास्तथा ।
मातृपितृगणैश्च येन गृहीता चौरैः सह तत्क्षणे

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

श्रीसुधर्मगुरोश्च पार्श्वे सततं गत्वा बहुप्रेमतः ।
दीक्षा चार्हती योगशुद्धहृदयाज्ञोयात्स जम्बू गुरुः ११
सुधर्मस्वामिनां पट्टः, भूषितो येन साधुना ।
जम्बूस्वामिगुरुः स स्यात्सङ्घकल्याणकृत्सदा ॥१२॥
ऋषभधरिणीपुत्रः, जम्बूनामा महामुनिः ।
सम्प्राप्तशीलसम्यक्त्वः, अभूत्साधुशिरोमणिः १३
षोडशवर्षपर्यन्तं, गृहे स्थित्वा ततः परम् ।
छद्मस्थे विंशतिर्ज्ञेया वर्षाणां च ततः परम् ॥१४॥
अशीतिवर्षपूर्णायुः परिपाल्य शिवं गतः ।
तत्पट्टे प्रभवः स्वामी, स्थापितः गुरुणा तदा ॥१५॥
आर्यप्रभवस्वामी च, कात्यायनीयगोत्रकः ।
आर्यशय्यंभवं प्राप्य, ततस्तेऽपि दिवं गताः ॥१६॥
वात्सगोत्रेषु सम्भूतः, आर्यशय्यंभवो मुनिः ।
यज्ञस्तम्भस्य चाधस्ताद्वीतरागजगद्गुरोः ॥१७॥
शान्तिनाथजिनेन्द्रस्य, वीतरागत्वदर्शिनी ।
मूर्त्तिं दृष्ट्वा प्रबुद्धोऽसौ, जैनीदीक्षां च लब्धवान् ॥
मनकाख्यस्वपुत्रस्य, शिवाय रचितं महत् ।
दशवैकालिकाख्यं हि सूत्रं स्वाचारदर्शकम् ॥१९॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

जगत्कल्याणरूपं तन्मत्वा संघेन रक्षितम् ।
पठित्वा नैकभव्याश्च, मोक्षमार्गे प्रयान्ति वै ॥२०॥
प्रभवस्वामिनः पट्टे, शय्यंभवो महामुनिः ।
श्रुतकेवलितां प्राप्य, व्यहरच्च महीतले ॥२१॥
सूरेः शय्यंभवस्यैव, पट्टेऽभूच्छ्रुतकेवली ।
यशोभद्राख्यसूरिश्च, प्रतापिसूर्यसन्निभः ॥२२॥
तुङ्गिकायनगोत्रीयः, सर्वलब्धिसमन्वितः ।
अनेकभव्यजन्तूनां, बोधको दोषरोधकः ॥२३॥
सम्भूतिविजयाख्यश्च, तत्पट्टे शान्तसेवधिः ।
माढरगोत्रसम्भूतः, सम्पूर्णश्रुतपारगः ॥२४॥
प्राचीनगोत्रसंजातः, भद्रबाहुमहामुनिः ।
नैकागमेषु निर्युक्तीः, कृतवान् बुद्धियोगतः ॥२५॥
कल्पसूत्राख्यसूत्रं च, उद्धृतं दृष्टिवादतः ।
संघोपद्रवनाशाय, स्तोत्रं व्यरचयत्तथा ॥२६॥
उपसर्गहराख्यं च, जगज्जन्तुहितावहम् ।
महास्तोत्रं कृतं येन, शीघ्रं दुरितनाशकम् ॥२७॥
तस्मै महामुनीन्द्राय, नमः श्रीभद्रबाहवे ।
रक्षणं जैनधर्मस्य, कृतं च मुनिना तदा ॥२८॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

सम्भूतिविजयस्यैव, पट्टे साधुशिरोमणिः ।
गौतमगोत्रसम्भूतः, स्थूलभद्रो महामुनिः ॥२६॥
पाटलिपुरवास्तव्यः, शकटालाख्यमंत्रिणः ।
पुत्रः कोशागृहे वासी, पितृमृत्योरनन्तरम् ॥३०॥
मन्त्रिमुद्राप्रदानाय, नन्दराजेन तत्क्षणे ।
आहूतः स्थूलभद्रोऽसौ, तन्मुद्रा ढौकिता तदा ॥३१
तां दृष्ट्वा स्थूलभद्रेण, चिन्तितं मानसे निजे ।
राज्योन्मादवशेनैव, पितृणां मृत्युता खलु ॥३२॥
कर्णे जप प्रभावेन, राज्ञां च मतिमान्द्यतः ।
पितृणां मृत्युता जाता, ममापि सा कथं न स्यात् ॥
अतो मृत्युनिरोधाय, त्यक्त्वा वेश्यानिवासता ।
मौनं विधाय तत्स्थानाद्विचाराय गतस्ततः ॥३४॥
दास्यामि चोत्तरं पश्चान्मानसे कृतनिश्चयः ।
सम्भूतिविजयाख्यश्च, सम्मुखे मीलितो गुरुः ॥३५
महामुनिं च तं दृष्ट्वा, स्वान्ते च चिन्तितं तदा ।
मृत्युनिरोधकार्याय, समर्थोऽयं मुनीश्वरः ॥३६॥
शरणं तस्य चेन्मे स्यान्मम श्रेयस्तदा भवेत् ।
इत्येवं मानसे मत्वा, दीक्षायै प्रार्थना कृता ॥३७

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

योग्यजीवं परिज्ञाय, गुरुणा दीक्षितः किल ।
राजसभां समागत्य, धर्मलाभं प्रदत्तवान् ॥३८॥
शोचितो राजप्रश्नश्च, लोचितमुत्तरं कृतम् ।
तं श्रुत्वा मानसे स्वीये, राज्ञा च परिचिन्तितम्॥३६
अहो ! चैतस्य दार्ढ्यं तदहो मानसनिश्चयः ।
अहो ! वैराग्यपुष्टित्वं, कामरागस्य मन्दिरे ॥४०॥
इत्येवं स्तुतिश्लाघां च, मुहुर्मुहुः करोत्यसौ ।
तत्काले राजहर्म्याच्च, निर्गतः शान्तसेवधिः ॥४१॥
कोशायाः प्रतिबोधाय, चातुर्मासाय याचनाम् ।
करोति गुरुसाम्मुख्ये, स्थूलभद्रो महामुनिः ॥४२
योग्यस्य योग्यतां ज्ञात्वा, गुरुणा स्वीकृतिः कृता ।
गतः कोशागृहे साधुः, चित्रशालां च याचते ॥४३
पूर्वप्रेमवशेनैव, शाला समर्पिता तदा ।
षड्रसभोज्यसामग्री, वर्षाकालो महांस्तथा ॥४४
मदनागारवासेन, मदनोऽपि विनाशितः ।
कोशाशृङ्गारसामग्रीं, दृष्ट्वापि नैव मोहितः ॥४५
वैराग्यमयवाक्येन, अध्यात्मदेशनादिना ।
प्रतिबोध्य च तां कोशामणुव्रतं प्रदत्तवान् ॥४६॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

शुद्धां च श्राविकां कृत्वा, आगतौ गुरुसन्निधौ ।
कठिनकार्यकर्त्तारं, स्थूलभद्रमुनीश्वरम् ॥४७
धन्यवादं मुहुर्दत्त्वा, कथितं गुरुणा तदा ।
साधुशिरोमणिर्ज्ञेयः, भारते नैव त्वादृशः ॥४८॥
दशपूर्वं च सम्पूर्णं, पठितं चार्थयोगतः ।
चतुःपूर्वं च सूत्रेण, अर्थेन नैव लब्धवान् ॥४९॥
सम्पूर्णदृष्टिवादं च, भद्रबाहुगुरोर्मुखात् ।
सम्प्राप्य भारतेऽन्तिमः, सञ्जातः श्रुतकेवली ॥५०
वेश्यागृहनिवासेन, षड्रसभोज्यभोगिना ।
कामरागवद् वेश्यायाः, हावभावे न मोहितः ॥५१॥
तादृशो भारते वीरः, न भूतो न भविष्यति ।
सत्साधुगणनायां च, प्रथमोस्थूलभद्रकः ॥५२॥
भगवत्स्थूलभद्रेण, स्वपट्टे स्थापितौ च द्वौ ।
आर्यमहागिरिश्चैकः, सुहस्ती च द्वितीयकः ॥५३
एलापत्ये च गोत्रे वै, सम्भूतः स महामुनिः ।
विच्छेदे जिनकल्पेऽपि, तत्कल्पतुलना कृता ॥५४
विशुद्धव्रतयोगेन, स्वीयवीर्यं परिस्फुरन् ।
कठिनं तादृशं कार्यं, कृतं तेन मुनीन्द्रकैः ॥५५॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

वासिष्ठगोत्रसम्भूतः, सुहस्तिगुरु संयमी ।
गुणानुरागरक्तत्वात्स्तुतिरेव चकार सः ॥५६॥
श्रेष्ठिगृहे स्थितः सूरिरार्यमहागिरेस्तथा ।
जिनकल्पविनाशोऽपि, जिनकल्पस्य कार्यता ॥५७
कृता येन मुनीन्द्रेण, तस्य स्तुतिं च किं ब्रुवे ।
इत्येवं भावना तेन, भाविता शुद्धयोगतः ॥५८॥
आर्यमहागिरिं तं च, वन्देऽहं भक्तिभावतः ।
धन्यास्ते मुनयो ज्ञेया, जैनशासनदीपकाः ॥५६
सुहस्तिसूरिबोधेन, भद्राश्राद्धासुतेन वै ।
अवन्तिसुकुमारेण, लब्धा दीक्षा च शास्वती ॥६०
द्वात्रिंशाच्च वधूस्त्यक्त्वा, स्वर्गतुल्यं च सौख्यकम् ।
तीव्रवैराग्ययोगेन, गृहीतं भावतो व्रतम् ॥६१॥
गुरोरनुमतिं प्राप्य, श्मशाने ध्यानकं कृतम् ।
पूर्वभवीयवैराच्च, जम्बूकी चागता तदा ॥६२॥
तया च भक्षिते देहे, न कृता स्वल्पदेवना ।
शुद्धचारित्रयोमेन, विग्रहं च समर्पितम् ॥६३
त्रिप्रहरीयदुःखं तदनुभूय महामुनिः ।
यतः स्थानादवन्त्यां च, आगतस्तत्र चागमत् ॥६४

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

तत्स्थाने मन्दिरं शुभ्रं, कारितं तत्सुतेन च ।
महाकालं च तन्नामधृतं, जिनालयस्य च ॥६५॥
अवन्तिपार्श्वनाथस्य, मूर्त्तिरपि च कारिता ।
प्रतिष्ठिता शुभे योगे, सूरिणा शुद्धमन्त्रकैः ६६॥
दुर्भिक्षे च परिप्राप्ते, अटन् रङ्कः क्षुधातुरः ।
भिक्षार्थं परिभ्रान्यन् सन्सूरीणां निकटे गतः ॥६७
गोचर्यार्थं गतः सूरिः, कस्यचिच्छ्रेष्ठिनो गृहे ।
विशुद्धमोदकीं भिक्षां, श्रेष्ठी ददाति भावतः ॥६८
भिक्षां च तादृशीं दृष्ट्वा रङ्को याचति मोदकान् ।
अतीव क्षुत्प्रयोगेन, मह्यं पीडा प्रजायते ॥६९॥
मह्यं ददातु भो किञ्चित्त्वत्पार्श्वे प्रचुराः खलु ।
विद्यन्ते मोदकाः सूरे ! ददाने नैव न्यूनता ॥७०॥
सूरिणा ज्ञानयोगेन, भाविकालो विलोकितः ।
अस्माच्छासनवृद्धिश्च, भाविकाले च निश्चिता ७१
स्वीयज्ञानेन विज्ञाय, पश्चादुक्तं मुनीश्वरैः ।
गृह्यते यदि दीक्षा चेन्ममाहारस्तु लभ्यते ॥७२॥
दीक्षा च दीयतां साधो, मा विलम्बो विधीयताम् ।
दत्ता च तत्क्षणे दीक्षा, भोजनं कारितं महत् ॥७३

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

अतिगरिष्ठभोज्यं च, रूक्षदेहे न पच्यते ।
भक्षितं प्रचुरं तेन, देहपीडा ततो भवेत् ॥७४
देहे व्याधिः समुत्पन्ना, अतीव प्राणघातिनी ।
तदीयभक्तिकर्त्तव्ये, श्रेष्ठिनस्ते समागताः ॥७५॥
तान् दृष्ट्वा मानसे स्वीये, व्यचिन्तयत्स साधुराट् ।
अहो संयमसाम्राज्यं, मीलितं गुरुयोगतः ॥७६॥
ददति ये न मे भिक्षां, तेऽपि सेवासु चागताः ।
सेवां च तादृशीं दृष्ट्वा, जाता धर्मेषु रागता ॥७७
धन्योऽहं कृतकृत्योऽहं, मानुष्यं सफलं मम ।
जैनधर्मस्य सम्प्राप्तिः, विना पुण्यं न जायते ॥७८॥
चिन्तामणिमहारत्नं, रङ्कगृहे न राजते ।
मादृशरङ्कहस्ते च, तदपि चागतं प्रभो ! ॥७९॥
तदेवं पुण्ययोगेन, लब्धं गुरुप्रसादतः ।
धन्यास्ते गुरवो ज्ञेया, धन्यो धर्मश्च सर्वदा ॥८०॥
इत्येवं भावनां कृत्वा, विशुद्धपरिणामतः ।
मृत्वा मौर्यकुले जातः, सम्प्रति नाम संप्रति ॥८१॥
चन्द्रगुप्तप्रपौत्रोऽयमशोकनृपपौत्रकः ।
कुणालस्य सुतो जातः गुरुदीक्षा प्रभावतः ॥८२॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

जातमात्रेण सम्प्राप्तमशोकदत्तराज्यकम् ।
जिनेन्द्ररथयात्रा च, प्रयाति कुत्रचिद्दिने ॥८३॥
संघेन बहुहर्षेण, अतीवाडम्बरेण च ।
सम्पूर्णनगरे तत्र, भ्रामिता रथयात्रिका ॥८४॥
आर्यसुहस्तिभिः साकं, सुसाधुवृन्दकं तथा ।
प्रचुरं च समायातं, धर्मोन्नतिनिमित्ततः ॥८५॥
राजमार्गे समायाते, सम्राट् च सम्प्रतिस्तदा ।
सम्मुखे च समायाति, दृष्टा च रथयात्रिका ॥८६॥
तन्मध्ये गुरुदेवं च, दृष्ट्वा चिन्तति मानसे ।
नेपथ्यं तादृशं चैव, पूर्वं दृष्टं मया क्वचिद् ॥८७॥
दर्शनाद् गुरुदेवानां, जातिस्मृतिरजायते ।
धन्योऽहं कृतकृत्योऽहं, जातं गुरोश्च दर्शनम् ॥८८
पूर्वभवं च संस्मृत्य, गुरुपादान्तिके तदा ।
आगत्यैव नमस्कारं, करोति शुद्धभावतः ॥८९॥
रङ्कावस्था मदीया क्व क्व च राज्यस्य योग्यता ।
जातमात्रेण सम्प्राप्तं, राज्यं च भारतं खलु ॥९०॥
एतत्सर्वंगुरूणां च, कृपया समवाप्तकम् ।
गुरुकृपा च किं किं नो, कार्यं चैव करिष्यति ॥९१

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

भवकूपाद्यथा पूर्वमुद्धृतो हस्तदानतः ।
तथैवोद्धरणं चैव, अस्मिन्भवे वितन्यनाम् ॥६२॥
गुरुणा श्रुतज्ञानेन, सर्वं विलोकितं तदा ।
तस्य भाविहितायैव, मार्गोऽपि दर्शितः खलु ॥६३
आगत्य गुरुदेवं च, पृच्छति भक्तिपूर्वकम् ।
त्वत्प्रसादेन सम्प्राप्ता, भारते चेदृशी भूमिः ॥६४॥
गुरुणा देशना पूर्वं, बोधितः सम्प्रतिस्तदा ।
विशुद्धजैनधर्मश्च, संप्राप्तो गुरुयोगतः ॥६५॥
शुद्धसम्यक्त्ववतां प्राप्य, सञ्जातो दृढधर्मवान् ।
अपूर्वधर्मसम्प्राप्तिः, गुरुं विना न जायते ॥६६॥
गुरूणामुपदेशेन, धर्मोन्नतिविधापने ।
पुस्फोरितं स्वीय वीर्यं स्वं, जैनधर्मे क्षणे क्षणे ॥६७॥
अवन्त्यां च नगर्यां हि साधुसभा नियोजिता ।
आर्यसुहस्तिद्वारेण, विभक्ता देशभागकाः ॥६८॥
अमुकसाधुसन्दोहैरमुके भागके खलु ।
विहर्त्तव्यं च सर्वत्र, दातव्या शुद्धदेशना ॥६९॥
अमुकैरमुके भागे, विहर्त्तव्यं च प्रेमतः ।
भारते चैकदेशोऽपि, मोक्तव्यो साधुना नहि ॥१००॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

साधुविहारशून्येन, भारतं धर्महीनकम्।
अतः सर्वत्र गन्तव्यं, साधुना भारते खलु ॥१०१
किं चानार्यप्रदेशेषु, साधुविहारहेतवे।
कृत्रिमसाधवस्तत्र, प्रेष्यन्ते च मया तथा ॥१०२॥
व्यवस्थां ईदृशीं कृत्वा, सर्वत्र दर्मिनां¹ तथा।
विहारः कारितस्तेन, प्रचारो विहितो वहु ॥१०३॥
स्वल्पकालेन जैनानां, साम्राज्यं तेन निर्मितम्।
धर्मप्रचारबाहुल्यं, सुहस्तिगुरुयोगतः ॥१०४॥
सपादलक्षसंख्याकाः, प्रसादास्तेन कारिताः।
जिनानां ते च विज्ञेयाः जैनधर्मस्य भारते ॥१०५॥
सपादकोटिसंख्याकाः, प्रतिमाः कारिताः शुभाः।
जीर्णानि मन्दिराण्येव, उद्धृतानि विशेषतः १०६
षट्त्रिंशत्सहस्राणि, उद्धृतानि तथा खलु।
एकलक्षाणि धातूनां, प्रतिमास्तेन कारिताः ॥१०७
शतशो दानशालानामुद्घाटनं कृतं तदा।
धर्मप्रचारकार्याय, म्लेच्छानां मोचितः करः ॥१०८

---

१ जैनसाधूनाम्।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

साधुविहारयोग्यानि, क्षेत्राणि कारितानि च।
वस्त्रपात्रान्नपानादि शुद्धं देयं च साधुभ्यः ॥१०९
इत्येवं घोषितं तेन, ज्ञापितं देशनादिना।
प्रतिपुरं प्रतिग्रामं, कृत्रिमसाधुद्वारतः ॥११०॥
यस्य गृहेषु यद्वस्तु, विद्यते शुद्धमानकम्।
तद्वस्तु साधुसामीप्ये, ढौकनं शुद्धभावतः ॥१११॥
यदि साधुश्च गृह्णाति, तदा देयं च तत्तथा।
मूल्यं तस्य महाराजा, तस्मै दास्यति कोशतः ११२
एवंरीत्या च म्लेच्छेषु, विहारः सुलभः कृतः।
साधुभिस्तत्र गत्वैव, प्रचारो बहुधा कृतः ॥११३॥
आर्यदेशेषु साधूनां, प्रचारे स्वल्पकष्टता।
अन्यत्र कष्टबाहुल्यं, तदपि सुलभीकृतम् ॥११४॥
अनेककोटिसंख्याकाः, जैनधर्मानुयायिनः।
जैनाश्च कारितास्तेन, श्रद्धारत्नसमर्पणात् ॥११५॥
धन्याश्च गुरवस्ते वै, धन्याः सम्प्रतिभूमिपाः।
शासनरागता तादृग्, येषां स्वान्ते विराजते ११६
तादृशगुरुशिष्याणां, समायोगस्तु दुर्लभः।
सुहस्तिना कृतं यादृक् तादृशं च करोति कः ॥११७

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

दन्तधावनकार्यं च, कर्त्तव्यं तेन तत्क्षणे।
नव्यमन्दिरनिर्माणजल्पनं कर्णगोचरे ॥११८॥
समायाति तदा चैव, कर्त्तव्यं दन्तधावनम्।
तादृशी प्रतिज्ञा तेन, कृता गुरुसमीपके ॥११९॥
चतुर्दिक्षु च सर्वत्र, मन्दिराणां विधापनम्।
भव्यमूर्त्तिप्रतिष्ठानां, विधानं शुभयोगतः ॥१२०॥
सुयोग्यशिष्ययोगेन, आर्यसुहस्तिना खलु।
भारते जैनसाम्राज्यं, कारितं धर्मभावतः ॥१२१॥
प्रभुवीरात्समारभ्य, आर्यसुहस्तिकावधि।
निर्ग्रन्थगच्छनाम्नैव, प्रसिद्धं वीरशासनम् ॥१२२॥
वीरनिर्वाणकालाच्च, द्वितीयस्मिन् शताब्दिके।
उत्तरार्धे च दुष्कालो, जातो द्वादशवार्षिकः ॥१२३
साधुसंख्यासु न्यूनत्वं, श्रुतज्ञानस्य ह्रासता।
श्रुतसाधोश्च रक्षायै, सम्प्रतेर्यत्नको महान् ॥१२४
जैनधर्मस्य रक्षायां, सर्वं च रक्षितं भवेत्।
स्थितिद्वयस्य चोन्नत्यै, निर्ग्रन्थसाधुना तदा ॥१२५
विभिन्नगच्छशाखानां, कुलानां व्यवस्थाकृता।
एवं रीत्या च कर्त्तव्ये, सर्वं व्यवस्थितं भवेत् ॥१२६

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

भद्रबाहुविनेयाच्च, गोदासाभिधानकात् ।
गोदासगणसम्भूतः, ज्ञातव्यो जैनशासने ॥१२७
आर्यमहागिरेः शिष्याद् बलिस्सहस्य नामतः ।
बलिस्सहगणस्यैव, उत्पत्तिस्तत्र जायते ॥१२८॥
सुहस्तिसूरिशिष्येभ्यः, उद्देहचारणौ गणौ ।
मानववेसवाट्याख्यौ, गणौ च निर्गतौ तदा ॥१२९
सुहस्तिसूरिशिष्याश्च, मुख्या द्वादशसंख्यकाः ।
पञ्चमः सुस्थितस्तेषु, षष्ठः सुप्रतिबुद्धकः ॥१३०॥
उदयगिरिमध्ये च, सूरिमन्त्रस्य कोटिशः ।
जापस्य जपनादेव, जातः कोटिकगच्छकः ॥१३१॥
कोटिकगच्छमध्ये च, वज्री विद्याधरी तथा ॥
उच्चनागरिका चैव माध्यमिका चतुर्थिका ॥१३२॥
शाखाश्च परिज्ञातव्याः उपशाखाऽप्यनेकशः ।
इत्येवं परिमन्तव्यं, निर्ग्रन्थ नामधेयकम् ॥१३३॥
निर्ग्रन्थग्रन्थतायाश्च, नामान्तराणि सन्ति वै ।
न तु विभिन्नगच्छत्वं; ज्ञातव्यं बुद्धिशालिना ॥१३४
आर्यसुहस्तिनां पट्टे, सुस्थितप्रतिबुद्धकौ ।
संजातौ मुख्यशिष्यौ द्वौ पट्टशोभाविवर्धकौ ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

आर्यमहागिरेः काले, आर्यसुहस्तिनस्तथा ।
द्वादशवार्षिकः कालः, अपतच्च भयङ्करः ॥१३६॥
तत्काले नैक संख्याकैः, साधुभिर्भोज्य त्यागतः ।
अनशनं च सम्प्राप्य, स्वर्गे गताश्च तत्क्षणे ॥१३७
दुष्कालस्य प्रभावेन, आगमज्ञानह्रासता ।
कलिंगाधिपराज्ञा च, खारवेलेन तत्क्षणे ॥१३८॥
जैनस्थविरसाधूनां, कुमारीपर्वते खलु ।
एकत्रीकरणायैव, आह्वानं च कृतं तदा ॥१३९॥
आर्यबलिस्सहश्चैव, बोधिलिङ्गनक्षत्रकौ ।
देवाचार्यश्च धर्मश्च, प्रभृत्यनेक साधवः ॥१४०॥
सुस्थितप्रतिबुद्धौ च, उमास्वातिस्तथा परः ।
श्यामाचार्याश्च तत्रैव, आगता स्थविरास्तथा ॥१४१
आर्यपोइणिकाः साध्व्यः, समितौ चागताः खलु ।
कलिङ्गभिक्षुराजश्च, पुष्यमित्रादिकाः किल ॥१४२॥
चतुर्विधकसंघस्य, आगतिस्तत्र जायते ।
कलिङ्गराजविज्ञप्त्या, साधुसाध्व्य अनेकशः ॥१४३
मगधमथुराबङ्गे, देशे धर्मप्रचारतः ।
आगमज्ञ मुनीन्द्रैश्च, आगमसंग्रहः कृतः ॥१४४॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

पूर्वधरमुनीन्द्रैश्च, पूर्वस्य संग्रहः कृतः ।
यस्य पार्श्वे च यज्ज्ञानं, तत्सर्वं संग्रही कृतम् १४५
आर्यसुहस्तिनः पट्टे, सुस्थितप्रतिबुद्धकौ ।
द्वयोर्गोत्राभिधाने च, व्याघ्रापत्यकनामके ॥१४६॥
कोटिशमन्त्रजापाच्च, कोटिकौ तौ प्रकीर्त्तितौ ।
काकन्दिकनगर्यां च, काकन्दकौ समुद्भवात् ॥१४७
सुविहितक्रियानिष्ठौ, सुज्ञाततत्त्वकौ तथा ।
महापुरुषरूपौ तौ, विज्ञेयौ जिनशासने ॥१४८॥
धर्मोन्नतिविधानाय, सततं चोद्यमौ तथा ।
धर्मं प्राणसमं मत्वा, धर्मध्यानपरायणौ ॥१४९॥
कोटिकगच्छके जाताः, इन्द्रदिन्नादि सूरयः ।
स्थविरप्रियग्रन्थश्च, विद्याधरादिकास्तथा ॥१५०॥
सुस्थितसूरिपट्टे च, कौशिकगोत्रभूषकः ।
दिन्नसूरिश्च तत्पट्टे, विज्ञेयो वीरशासने ॥१५१॥
आर्यसिंहगिरिश्चैव, तत्पट्टे शान्तसेवधिः ।
संजातो दृढधर्मश्च, जगत्कल्याणकारकः ॥१५२॥
प्रसङ्गतोऽनुवक्तव्याः, प्रभावशालिसूरयः ।
आद्यश्च कालिकाचार्यः, गर्दभिल्लविनाशकः ॥१५३

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

सांवत्सरी महापर्वं, प्रागस्ति पञ्चमी दिने ।
चतुर्थ्यां कालिकाचार्याज्जातं संघनियोगतः ॥१५४॥
धारावासनगर्याश्च, वीरसिंहस्य पुत्रकः ।
भृगुकच्छनृपाणां च, मातुलः समभूत्तदा ॥१५५॥
गुणाकराख्यसूरीणां, प्रबुद्धो देशनादितः ।
जैनीं दीक्षां समादाय, सम्भूतो जैनसाधुराट् ॥१५६
तद्भगिन्याः सरस्वत्या, भ्रातृदीक्षाऽनुयोगतः ।
तया दीक्षा प्रपन्ना च, विशुद्धा गुरुसन्मुखे ॥१५७
बुद्धिबलेन साधुः सः, सूरित्वं प्रतिपन्नवान् ।
निरतिचारचारित्रं, पालयति च सर्वदा ॥१५८॥
अनुमतिं गुरूणां च, प्राप्य विहृतवांस्तथा ।
सर्वत्र परिभ्राम्यन् सनुज्जयिन्यां समागतः ॥१५०॥
रूपलावण्ययुक्ता या, विशुद्धब्रह्मचारिणी ।
साध्वी सरस्वती साऽपि, तत्पूर्यां च समागता ॥१६०
गर्दभिल्लनृपश्चैव, सर्वदा स्त्रीषु लम्पटः ।
महासती स्वरूपं च, दृष्ट्वा स मोहमूर्छितः ॥१६१
बलात्कारात्समादाय, अन्तःपुरे स नीतवान् ।
तन्मुक्त्यर्थं च सूरीशैः, प्रयत्नश्च कृतो बहु ॥१६२

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

विनाशकालयोगेन विपरीता मतिर्भवेत् ।
दुर्बुद्धिगर्दभिल्लेन, स्वान्ते नैव विचारितम् ॥१६३
साध्वी शीलसुरक्षायै, आचार्यैश्च विचारितम् ।
विनाऽन्यराजसामर्थ्यात्साध्व्याश्च मोचनं न हि ॥
शकराजं समानीय, भीषणयुद्धमादृतम् ।
गर्दभिल्लसमुच्छेद्य, साध्वी शुद्धा च मोचिता १६५
बलभानुमित्रकानां च, तद्राज्यं हि समर्पितम् ।
कालिकाचार्यबोधेन, ताभ्यां धर्मश्च स्वीकृतः ॥१६६
तदाग्रहाच्च तत्रैव, चातुर्मासी कृता तदा ।
मन्त्रिणां मतिमांद्येन, प्रतिष्ठानपुरे गतः ॥१६७॥
तत्रस्थ नृपसामीप्ये, जैनधर्मोपदेशनम् ।
प्रभावशालिबोधेन, प्रबुद्धः सोऽपि भूपतिः ॥१६८॥
राजाग्रहनियोगेन, चतुर्थी दिवसे खलु ।
पञ्चमीतः समानीय, पर्व तदा समादृतम् ॥१६९॥
अद्यावधि च तत्पर्व, प्रचलति च भारते ।
तदीयाज्ञा शिरोधार्य, स्वीकृतिश्च कृता समैः ॥१७०
धन्यास्ते कालिकाचार्याः, धर्मोन्नतेश्च कारकाः ।
साध्वीशीलस्य रक्षायै, स्वशक्तिपरिस्फोटिता ॥१७१

Shree Sudharmaswami Gyanbhandar-Umara, Surat　　www.umaragyanbhandar.com

आर्यदिन्नस्य पट्टेषु, आर्यसिंहगिरिस्तथा ।
कौशिकगोत्रसम्पन्नः, जातिस्मरणवान् खलु ॥१७२
तत्पट्टे गौतमाभिख्य, गोत्रे सूरिपुरन्दरः ।
वज्रस्वामिमहासाधू, सम्भूतो लब्धिभाक् तथा ॥
आर्यधनगिरेः पुत्रः, सुनन्दाकुक्षिसम्भवः ।
तुम्बवनाख्य ग्रामस्थः, जातो धर्मपरायणः ॥१७४॥
स्वोत्पत्तिसमये श्रुत्वा, पितृदीक्षा मनोहराम् ।
संजात जातिस्मृत्या च, मातुरुद्वेगहेतवे ॥१७५॥
रोदति सततं तत्र, षणमासावधिकं तथा ।
भिक्षार्थं चैकदा साधुः धनगिरिः समागतः ॥१७६
तं दृष्ट्वा च तया प्रोक्तं, गृह्यतां स्वीय पुत्रकम् ।
धनगिरिमहाभागैः, गृहीतः सोऽपि तत्क्षणे ॥१७७
महाभारत्व योगेन, दत्तं वज्राभिधानकम् ।
पालनस्थः स बालोऽपि, जातश्चैकादशांगवित् १७८
यदा त्रिवार्षिको जातः, रूपलावण्यसंयुतः ।
तं दृष्ट्वा स्वीय मातृणां, मोहश्च वर्धते खलु ॥
मात्रा राजसभां गत्वा, पुत्राय प्रार्थना कृता ।
धनगिरिः सुनन्दा च, आगतौ राजमन्दिरे ॥१८०॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

पुत्रव्यामोहकार्याय, सुनन्दा मुखभक्षिकाम् ।
अनेकविधता युक्तां, तत्र गत्वा च ढौकते ॥१८१॥
धनगिरिमहाभागैः, साधुचिह्नं रजोहरम् ।
तत्समीपे च मुक्त्वा वै, प्रोक्तं द्वाभ्यां च तत्क्षण ॥
तुभ्यं यद्रोचते तद्धि, गृह्यतां भाग्यसेवधे ।
मोहसाधनमिष्टान्नं, त्यक्त्वा रजोहरं धृतम् ॥१८३
ततो मातापि वैराग्यादीक्षां गृह्णाति भावतः ।
यदाष्टवार्षिको जातः, तदा जृम्भकदेवकः ॥१८४॥
पूर्वभवीय मित्रोऽसौ, परीक्षायै तदागतः ।
उज्जयिन्याश्च मार्गेषु, वृष्टिनिवृत्तिकालिके ॥१८५॥
कुष्माण्डशुद्धभिक्षां च, दीयमानां न गृह्णीयात् ।
अनिमेषत्व चिह्नेन, जानाति देवपिण्डकम् ॥१८६॥
मह्यं न कल्पते तद्धि, कथितं तेन तत्क्षणे ।
तुष्टदेवेन तत्काले, दत्ता वैक्रियलब्धिका ॥१८७॥
द्वितीय समये भिक्षा, घृतपुराभिधानिका ।
दीयमानापि साऽशुद्धा, देवपिण्डस्वरूपिका ॥१८८॥
तद्योग्यां च मत्वावै तुष्ट जृम्भकदेवतः ।
सम्प्राप्ता च महाविद्या, आकाशगामिनी तदा ॥८८९

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

अन्यदा पाटली पुत्रे, विहारेण समागताः ।
तत्र साध्वी मुखाच्चैव, वज्रस्वामि गुणावलिम् ॥
श्रुत्वा च रुक्मिणी नाम्नी, कनीधनस्य श्रेष्ठिनः ।
गृह्णाति नियमं तत्र, वज्रस्वामि पतिं विना ॥१६१॥
नान्यं पतिं करिष्यामि, इति च प्रतिज्ञा कृता ।
धनश्रेष्ठिवरेणैव, नैकोपायाः कृताः खलु ॥१६२॥
परन्तु सा प्रतिज्ञाताद् न च्युता लेशमात्रतः ।
तदा वज्रमहाभागः, आगतश्च पुरे वरे ॥१६३॥
श्रुत्वा धनेन तत्काले, स कोटिद्रव्यसंयुताम् ।
रुक्मिणीं दीयमानां च, न गृह्णाति स साधुराट् १६४
प्रतिबोध्य तदा तां च, वैरागमयवाक्यजैः ।
गम्भीरशुद्धबोधैश्च, दत्तं रत्नत्रयं तदा ॥१६५॥
शुद्धा साध्वी च संजाता, वज्रगुरूपदेशतः ।
चारित्रं च विशुद्धं तत्पालयति सहर्षतः ॥१६६॥
दुर्भिक्षे चैकदा जाते, संघं संस्थाप्य पट्टके ।
सुभिक्षीय पुरीमध्ये, गुरुभिः संघ आनीतः ॥१६७
पर्युषणा समायाते, प्रभुभक्तिप्रवर्धिका ।
पुष्पादि सर्वसामग्री, निषिद्धा बोद्धधर्मिभिः ॥१६८

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

संघेनैव समागत्य, गुरुणा प्रार्थना कृता ।
विना विशुद्धसामग्रीं, प्रभुभक्तिः कथं भवेत् ॥१६६
भवादृग्गुरुसंयोगे, कथं भक्तौ च विघ्नता ।
द्वेषबुध्या च तेनैव, प्रतिषेधः कृतः खलु ॥२००॥
जैनधर्ममहाद्वेषी, अयं च बौद्धभूपतिः ।
स्वसत्तायाः समुन्मादः, धर्मद्वेषेण जायते ॥२०१॥
जैनानां भक्तिनाशाय, उपायस्तेन शोधितः ।
अतः केनापि योगेन, जैनत्वं परिदृश्यताम् ॥२०२॥
गुरुणा संघविज्ञप्त्या, तद्भक्तिपरिपुष्टये ।
धर्मोन्नतिसमुद्दिश्य, गताश्च सूरयस्ततः ॥२०३॥
व्योमविद्याप्रयोगेन, माहेश्वरी पुरी खलु ।
मालिनं पितृमित्रं च, जल्पन्ति पुष्पहेतवे ॥२०४॥
हिमवत्पर्वते गत्वा, श्रीदेव्याश्च समीपके ।
हुताशनवनाच्चैव, लक्षशः कुसुमानि च ॥२०५॥
महापद्मानि संगृह्य, देवकृत विमानके ।
माहेश्वरीय पुष्पाणि, लात्वा महोत्सवेन च ॥२०६॥
दुन्दुभिनादपूर्वेण, आगतास्तत्र सूरिराट् ।
देवेन सर्वपुष्पाणि, दत्तानि श्रावकाय च ॥२०७॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

अतीव भक्तिपूर्वेण, अतीवानन्दयोगतः ।
प्रभुभक्तिं प्रकुर्वन्ति, सर्वे च तत्र श्रावकाः ॥२०८
विशुद्धपुष्पगन्धेन, शुद्धसुगन्धिवस्तुना ।
जिनेन्द्रपूजनं दृष्ट्वा, राज्ञा मनसि शोचितम् ॥२०६
सर्वं गुरुप्रसादेन, जैनसंघेन कृतं तथा ।
तादृशा गुरवो नैव, अस्माकं दर्शने खलु ॥२१०॥
गुरुदर्शनकार्याय, राजा तत्र समागतः ।
गुरूणां देशनां श्रुत्वा, शुद्धकल्याणकारिणीम् ॥२११
सम्यग्रत्नं परिप्राप्य, जैनधर्मप्रभावनाम् ।
करोति चातिभावेन, दृढधर्मपरायणः ॥२१२॥
अहो गरुमहात्म्यं तद्, बोद्धं च प्रतिबोध्य वै ।
तद्देशे जैनधर्मत्वं, स्थापितं गुरुणा तदा ॥२१३॥
शत्रुंजये महातीर्थे, श्रेष्टिजावडभावडैः ।
विक्रमशतके पूर्णे, अष्टवर्षोत्तरे तथा ॥२१४॥
तत्तीर्थोद्धृतिकार्यं च, कृतं तैः श्रेष्टिभिः किल ।
प्रतिष्ठायाश्च कर्त्तव्ये, गुरवः प्रभावशालिनः ॥२१५
विद्यया परिपूर्णाश्च, तत्कार्ये प्रार्थिताश्च तैः ।
तेषां च भाग्ययोगेन, मीलिता दशपूर्विणः ॥२१६

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

वज्रस्वाम्याख्य सूरीन्द्राः, अतिप्रभावशालिनः ।
विहारानुक्रमेणैव, आगतास्तेऽपि तत्र वै ॥२१७॥
विज्ञप्तिं श्रेष्ठिनां श्रुत्वा, महालाभाय ते तथा ।
स्वीकृत्यैव प्रतिष्ठायाः, कार्यं प्रारब्धकं खलु ॥२१८
कपर्दीयक्षविघ्नेन, मूलनायकस्वामिनाम् ।
स्थैर्यं च नैव जायेत, उत्थापनं पुनः पुनः ॥२१९॥
महाविद्याबलेनैव, ज्ञाता तस्यैव विघ्नता ।
यक्षं सन्तोष्य तत्रैवाधिष्ठातृत्वं कृतं तदा ॥२२०॥
तन्मूर्त्तिः स्थापिता तत्र, तत्तीर्थे गुरुणा खलु ।
आधिपत्यं च तस्यैव, शत्रुंजये विराजते ॥२२१॥
महाकार्यं विधायैव, गुरुभिर्विहृतिः कृता ।
तीर्थोद्धारप्रतिष्ठा च, जाता सद्गुरुयोगतः ॥२२२
अन्यदा गुरुदेवानां, कफोद्रेकप्रभावतः ।
भोजनादनुस्वाद्यर्थं, शुण्ठीग्रंथिश्च रक्षिता ॥२२३॥
कर्णे च स्थापिता साऽपि, विस्मृता वृद्धभावतः ।
प्रतिक्रमणकाले च, पतिता कर्णतस्तदा ॥२२४॥
आसन्नमृत्युतां ज्ञात्वा, सूरिणां च प्रमादतः ।
द्वादशवर्षपर्यन्तं, दुर्भिक्षस्य प्रवेशनम् ॥२२५॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

सूरिर्ज्ञानेन विज्ञाय, वज्रसेनं हि तत्क्षणे ।
आहूय कथितं तेन, लक्षमूल्योदनात्खलु ॥२२६॥
त्वं भिक्षां च यदाऽऽनुयाः, तदुत्तरदिने च भोः ।
सुभिक्षं तु त्वया ज्ञेममन्यथा न कदाचन ॥२२७॥
पूर्वं च दशमं तस्माद् व्युच्छिन्नं वज्रस्वामितः ।
वज्रसेन महाभागैः, तदनु विहृतिः कृता ॥२२८॥
सोपारकपुरे तस्माच्छिष्येण सह चागतः ।
जिनदत्ताख्य भव्यानां, भिक्षार्थं गतवान् गृहे २२९
तत्पत्न्याश्चेश्वरी नाम्न्याः क्रीतं च लक्ष्यमूल्कम् ।
अन्ने तस्मिंश्च संक्षिप्तं, विषं हालाहलं तदा २३०
विचारितं स्वस्वान्ते च, अन्नं धनं न विद्यते ।
आगतेऽह्नि च भिक्षूणां, भिक्षां दास्ये कथं खलु २३१
दर्शयामि कथं स्वास्यं, विचार्य विषवत्कृतम् ।
तस्या विशुद्धभावोऽपि, ज्ञातो हि गुरुणा तदा २३२
आगत्य सूरिणा प्रोक्तं, नैवं कार्यं कदाचन ।
श्वः काले भूरिपोतं तद्, आगच्छति च धान्यकं २३३
तच्छ्रुत्वा च सहर्षेण, जिनदत्तेन शोचितम् ।
यदि सत्यं भवेत्तर्हि, आनन्दः परिजायते ॥२३४॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

प्रचुरधान्यसम्प्राप्ते, सुकालः परिजायते ।
नागेन्द्रचन्द्रनिर्वृत्तिविधाधरैः सुतैः सह ॥२३५॥
जिनदत्तोहि चेश्वर्या, प्रेरितो वृतमात्तवान् ।
पुत्रचतुष्कनाम्ना च, भिन्नाः शाखाश्च निसृताः ।
चन्द्रनाम्ना च तद् गच्छः, शाखारूपेण जायते ।
नागेन्द्रेणैव नागेन्द्रः, चन्द्रेण चन्द्रगच्छकः ।
निर्वृतिकामरूपेण, निर्वृतिनागच्छकः ।
विद्याधरेण तद्रूपः, एवं च परिज्ञायताम् ॥२३८॥
वज्रसेनमहाभागपट्टे च चन्द्रसूरयः ।
प्रभावशालिनस्तेपि, ज्ञातव्या जैनशासने ॥२३९॥
प्रभावशालिसाधूनां[1], सिद्धसेनदिवाकराः ।
ज्ञातव्याश्च महाभागाः, विक्रमप्रतिबोधकाः ॥२४०
वृद्धवादिगुरूणां च, पार्श्वे कुमुदचन्द्रकैः ।
महाविज्ञैः समागत्य, स्वकल्याणं च साधितम् २४१
बङ्गदेशीय कुमारराजं च देशनादिना ।
जैनं कृत्वा च सुश्राद्धः, कारितो जेनशासने ॥२४२

1—प्रभावशालि साधूनां मध्ये ।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

परमार्हतभक्तोऽपि, संजातो गुरुयोगतः ।
विहृत्यच ततः स्थानादवन्त्यां गुरवो गताः ॥२४३
अवन्तिपार्श्वनाथस्य, अवन्तीनगरीयके ।
मूर्त्तिर्ब्राह्मणलोकैश्च, स्वाधीनी कृत्य सर्वथा ॥२४४
जैननामापमानं च, कृतं तादृशकार्यतः ।
तत्र गत्वा महाकालमन्दिरे च कृता स्थितिः ॥
कल्याणमन्दिराख्यं च, स्तोत्रं सुरचितं तदा ।
तत्स्तोत्रपठने यच्च, संजातं तन्निशम्यताम् ॥२४६
पञ्चदशमश्लोकस्य, उच्चारणं यदा भवेत् ।
तदा तच्छिवलिङ्गं च, स्फुटितं गुरुमंत्रतः ॥२४७॥
तन्मध्ये पार्श्वनाथस्य, प्रतिमा निःसृता शुभा ।
तद्दृष्ट्वा सर्वलोकाश्च कुर्वन्ति शुद्धभावनाम् २४८
महाश्चर्यं महाश्चर्यं, जगति गुरुणा कृतम् ।
विक्रमादित्य राजापि, आगतो गुरुसन्निधौ ॥२४९
स्तुतिं च गुरुदेवानां, करोति भक्तिभावतः ।
विक्रमप्रतिबोधाय, प्रारब्धा देशना खलु ॥२५०॥
गुरूपदेशयोगेन, विशुद्धशक्तियोगतः ।
प्रतिबोध्यैव राजानं श्रावकः सूरिणा कृतः ॥२५१॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

संस्कृतं प्राकृतं ज्ञानं, प्रचुरं परिज्ञायताम् ।
तत्सदृशोहि विज्ञश्च, तत्काले भारते नहि ॥२५२॥
जैनदर्शनशास्त्राणि, शुद्धन्याययुतानि च ।
निर्मापितानि जैनेषु, विद्यन्ते खलु भारते ॥२५३॥
आद्यं निर्माणं न्यायशास्त्राणां सूरिणा कृतम् ।
तत्पश्चान्न्यायशास्त्रस्य, ग्रन्थानैकाश्च निर्मिताः ॥
सर्वागमीय ग्रन्थानामनुवादश्च संस्कृते ।
कर्त्तव्ये स्वीय जिज्ञासा, दर्शिता संघसम्मुखे ॥२५५
नमस्कारमहामंत्रानुवादश्च कृतस्तदा ।
तच्छ्रुत्वा संघमुख्येन, प्रायश्चित्तं प्रदर्शितम् ॥२५६
तत्प्रायश्चित्तरूपेण, विक्रमप्रतिबोधनम् ।
कृतं च गुरुदेवेन, बहुयुक्तिप्रयोगतः ॥२५७॥
विक्रमीय चरित्राच्च, विज्ञेयं ज्ञानशालिना ।
अत्र तु नाममात्रेण, दर्शितमधुना मया ॥२५८॥
सिद्धाचलस्य यात्रायै, महासंघश्च योजितः ।
निष्कासितो महानेव, विक्रमेणैव तत्क्षणे ॥२५९॥
ओङ्कारनगरे जैनमन्दिरं नूतनं कृतम् ।
अश्वावबोधतीर्थस्य, उद्धारोऽपि कृतः खलु ॥२६०॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

अनेकधर्मकार्याणि, कारितानि च सूरिणा ।
सन्मतितर्कन्यायावतारादिकाश्च ग्रन्थकाः ॥२६१
सर्वोत्तमाश्च विज्ञेयाः, प्रौढयुक्त्या समन्विताः ।
तन्नामस्मृतिमात्रेण, पापं च परिनश्यति ॥२६२॥
दक्षिणदेशमध्ये च, सूरीणां स्वर्गवासता ।
सञ्जाता कालयोगेन, दिवाकरा दिवं गताः ॥२६३
धन्यास्ते सूरयो ज्ञेयाः, जैनधर्मस्य दीपकाः ।
अद्यावधि च तन्नाममन्त्ररूपेण गीयते ॥२६४॥
चन्द्रगच्छादि गच्छाश्च, नामान्तरस्वरूपतः ।
चतुरशीतिगच्छाश्च, सञ्जाता वाचनादितः ॥२६५
चन्द्रगच्छादि गच्छाश्च, रूपान्तरेण ते तथा ।
नामान्तरं स्वरूपेण, विज्ञेया जैनशासने ॥२६६॥
निर्ग्रन्थ[1] प्रथमं नाम, द्वितीयं कोटिकं तथा ।
चन्द्रगच्छस्तृतीयं च, अभिधानं प्ररूपितम् ॥२६७
वनगच्छचतुर्थं च अभिधानं निगद्यते ।
यतो हि तच्च संजातं, तत्स्वरूपं च लेशतः ॥२६८

१—निर्ग्रन्थ गच्छस्य ।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

चंद्रसूरीशपट्टेषु, सामन्तभद्रसूरयः ।
महाप्रतापसंयुक्ताः जगद्युद्योतकारकाः ॥२६९॥
दिगम्बरत्वभेदोऽपि, पतितः कालदोषतः ।
सम्प्रदाय द्वयस्यापि, ते पूज्याः सूरयो मताः ॥२७०
तन्निर्मिताश्च सद्ग्रन्थाः, मन्यन्ते चाप्तरूपतः ।
द्वाभ्यां च सम्प्रदायाभ्यां, संशयो नात्र विद्यते ॥
विवादो नैव केषाञ्चित्तद् विषये प्रजायते ।
युक्त्यनुशासनं देवागमस्तोत्रं च सुन्दरम् ॥२७२॥
स्वयम्भूस्तोत्ररूपाश्च, ग्रन्थाः सर्वैश्च सम्मताः ।
सूरीणां वृद्धदेवानां, प्रतिबोधस्य हेतवे ॥२७३॥
देवागमीय स्तोत्रं तत्कृतं सामन्तसूरिभिः ।
दिगम्बराश्च ते सन्ति, इत्युक्तौ न प्रमाणता ॥
प्रमाणाभावतो नैव, तादृग् वाक्यं च मन्यते ।
प्रमाणविरहेणापि, यदि त्वया निगद्यते ॥२७५॥
तदा शशविषाणं च, मन्यतां च स्वच्छन्दतः ।
कल्याणमन्दिरस्यैव सिद्धसेनदिवाकराः ॥२७६॥
श्वेताम्बराश्च कर्त्तारः, प्रसिद्धं युक्तियुक्ततः ।
तथाप्यज्ञानदोषेण, नग्नाटत्वं च घोषितम् ॥२७७॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

यथैव मानतुंगानां, सूरीणां स्वीकृतिः कृता ।
तथैवात्रापि ज्ञातव्यं, सामन्तभद्रसूरिषु ॥२७८॥
तद् ग्रन्थेषु प्रमाणं च, नग्नाटसाधकं न हि ।
उत्कटत्यागभावेन, स्वीकृता वनवासता ॥२७६॥
दृष्ट्वा दिगम्बरैस्तेषु, घोषितं च दिगम्बरम् ।
योगिनां समदृष्टित्वात्पक्षपातो न विद्यते ॥२८०॥
पूर्वविदश्च ते ज्ञेयाः, घोरतपस्विनस्तथा ।
आगमस्यानुसारेण, क्रियायाः कारकाश्च ते ॥२८१॥
देवकुलादिशून्येषु, स्थानेषु वनवासता ।
वनवासित्वयोगेन, वनगच्छोपि निर्गतः ॥२८२॥
वनवासित्वगच्छोऽपि, निर्ग्रन्थतश्चतुर्थकः ।
प्ररूपणासु भेदस्य, लेशमात्रं न विद्यते ॥२८३॥
सामन्तभद्रपट्टेषु, वृद्धदेवाः समागताः ।
सततं धर्मवृद्धीणां, कारका दुःखवारकाः ॥२८४॥
तत्पट्टे परिज्ञातव्याः, प्रद्योतनाख्य सुरयः ।
शासनरागता तेषां हृदये परिराजते ॥२८५॥
सूरयो मानदेवाख्याः, तत्पट्टवृद्धिकारकाः ।
कर्त्तारो लघुशान्तीनां, सङ्घोपद्रवनाशकाः ॥२८६॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

तत्पट्टे मानतुङ्गाख्याः, सूरयो धर्मवर्धकाः ।
विशेषरूपतस्तेषां, स्वरूपं कथ्यते मया ॥२८७॥
धारानगरवास्तव्य; वृद्धभोजाभिधानकः ।
तन्नृपस्य सभायां च, भक्तामरस्य कारकाः २८८॥
नैकतालकदानेन, सूरीणां च नियन्त्रितः ।
एकैकश्लोक पाठेन, एकतालकत्रोटनम् ॥२८९॥
सम्पूर्णस्तोत्रसंजाते, सर्वतालकत्रोटनम् ।
सूरिभिश्च कृतं तत्र, महाश्चर्यप्रदर्शकम् ॥२९०॥
तादृशीं गुरुशक्तिं च, दृष्ट्वा नृपश्चमत्कृतः ।
जैनधर्मप्रभावोऽपि, तत्सभासु प्रजायते ॥२९१॥
गुरूपदेशलाभेन, प्रभावः प्रसृतो बहु ।
प्रभावशालिनस्ते च, सूरयो जगती तले ॥२९२॥
बप्पभट्टिगुरूणां च, स्वरूपं लेशमात्रतः ।
प्रसङ्गतो निगद्येत, स्वकीय ज्ञानहेतवे ॥२९३॥
पाञ्चालदेशवास्तव्य, सूरपालनृपस्य च ।
पुत्रास्ते सूरयो ज्ञेया, जगदुद्योतकारकाः ॥२९४॥
लघुवयसि दीक्षा च, गृहीता शुद्धभावतः ।
सिद्धसेनाख्य सूरीणां, पार्श्वे च मोढगच्छके २९५

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

ज्ञानचारित्रयोगेन, आचार्यत्वे नियोजिताः ।
संजाता बप्पभट्ट्याख्याः, सूरयो जैनशासने २९६
प्रत्यहं श्लोकसाहस्त्रं, सूरिकण्ठेषु जायते ।
तादृशशक्तिसामर्थ्यमन्यत्रनैव विद्यते ॥२९७॥
गोपगिरिनृपाणां च, उपदेशप्रभावतः ।
प्रतिबोधनकार्यं च, सूरिभिश्च कृतं तदा ॥२९८॥
आमराजेन तत्काले, विशालं खलु मन्दिरम् ।
निर्मापितं च तत्रापि, प्रतिमा सुमनोहरा ॥२९९॥
सुवर्णमयमूर्त्तिश्च, महामूल्येन कारिता ।
प्रतिष्ठिता शुभे लग्ने, सूरिभिः शुभमन्त्रतः ॥३००।
महावीरप्रभूणां च, सा मूर्त्तिः परिज्ञायताम् ।
आमराजस्य भाग्येन, जातं सुन्दरमन्दिरम् ।३०१।
लक्षणावर्तग्रामस्य[1], नृपस्य प्रतिबोधकाः ।
धर्मराजं शुभे धर्मे, संस्थाप्य स दृढी कृतः ॥३०२।
वर्धनकुञ्जरादीनां, बोद्धानां परिजीवकाः ।
वादिकुञ्जरसिंहस्य, उपाधिर्मीलितस्तदा ॥३०३॥

---

१ लक्ष्मणावर्त्त

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

तस्य सेनापतिं चैव, प्रतिबोध्यैव तत्क्षणे ।
दत्त्वा भागवतीं दीक्षामात्मकल्याणकारितम् ३०४
सूरीणामुपदेशेन, आमराजेन भावतः ।
सिद्धाचलादि तीर्थानां, सङ्घो निष्कासितो महान् ॥
इत्याद्यनेककार्याणि, कृतानि सूरिभिः खलु ।
जैनधर्मप्रभावश्च, संजातो गुरुयोगतः ॥३०६॥
मानतुंगाख्यसूरीणां, पट्टे च वीरसूरयः ।
यथार्थनामयुक्तास्ते, शासनवृद्धिकारकाः ॥३०७॥
सूरयो जयदेवाख्याः, तत्पट्टे शुभचिन्तकाः ।
स्वीय शक्त्यनुसारेण, जैनधर्मप्रभावकाः ॥३०८॥
देवानन्दाख्य सूरिश्च, तत्पट्टपरिवर्धकः ।
शुद्धा क्रियानुरागेण, रक्तं च स्वीयमानसम् ॥३०९॥
विक्रमसूरयो ज्ञेयाः, तत्पट्टपरिदीपकाः ।
जैनसिद्धान्तज्ञातारः, स्वपरोन्नतिकारकाः ॥३१०
ततो नृसिंहसूरीणां, परिचयो विशेषतः ।
कार्यते धर्मयोगेन, स्वपरोन्नति हेतवे ॥३११॥
स्वपरशास्त्रज्ञातारः; महाविज्ञाश्च ते मताः ।
नरसिंहपुरे यक्षस्योपदेशप्रदाः खलु ॥३१२॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

तं प्रतिबोध्य तस्माच्च, मांसाहारस्य भक्षणम् ।
त्याजितं सूरिभिश्चैव, स्वप्रभावः प्रदर्शितः ।३१३।
क्षोमाणानामधेयं च, राजकुलं स्वशक्तितः ।
प्रतिबोध्यैव धर्मेषु, दृढीकृतं च सरिभिः ॥३१४॥
तद्वंशीय समुद्राख्य, कुमारं प्रतिबोध्य च ।
दीक्षां भगवतीं दत्वा, कल्याणं कारितं च तैः ३१५
समुद्रसूरयः पश्चात्ते जाता भाग्ययोगतः ।
वादे दिगम्बरं जित्वा, स्वशक्तिपरिदर्शकाः ॥३१६
नागहृदीय तीर्थं च, ततश्च स्वायती कृतम् ।
श्वेताम्बरीय संघस्य, विजयः कारितश्च तैः ।३१७।
महाप्रभावसद्युक्ताः जैनशासनदीपकाः ।
आचार्यनरसिंहाख्याः, जयन्तु जगती तले ॥३१८।
समुद्रसूरयो ज्ञेयाः, धर्मोन्नति प्रभावकाः ।
तत्पट्टे शोभमानास्ते, जगदानन्ददायकाः ॥३१९॥
तत्पट्टं भूषयामासुः, मानदेवाख्य सूरयः ।
शासनभक्तिकर्त्तारः, वादीभसिंहसादृशाः ।३२०॥
विबुधप्रभसूरीन्द्राः तत्पट्टं भूषयन्ति वै ।
अनेकशास्त्रज्ञातारः, भव्यानां प्रतिबोधकाः ।३२१॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

तत्पट्टं शोभयामासुः, जयानन्दाख्य सूरयः।
सर्वत्रानन्ददातारः, जगत्कल्याणकारकाः ॥३२२॥
अलंचक्रुश्च तत्पट्टं, रविप्रभाख्य सूरयः।
रविसमप्रकाशं च, कुर्वन्ति भारते खलु ॥३२३॥
प्रकाशयन्ति तत्पट्टं, यशोदेवाख्य सूरयः।
चन्द्रोज्वलयशोवादैः, शासनं दीपयन्ति ते ॥३२४
प्रद्युम्नसूरिदेवानां, विषये लेशमात्रकम्।
लिख्यते स्वात्मबोधाय, अन्येषां ज्ञानहेतवे ॥३२५।
मेदपाटनृपाणां च, अल्लाख्यानां च बोधकाः।
धर्मवादविधाने च, अद्वितीयाः प्रकीर्त्तिताः ॥३२६
तैराचार्यमहाभागैः, राजसभासु चान्यदा।
नग्नाटवादिनां तत्र, पराजयश्च कारितः ॥३२७॥
श्वेताम्बरं दृढीकृत्य, युक्त्या च साधितं तदा।
सर्ववादेषु नग्नानां, पराजयश्च जायते ॥३२८॥
त्रिभुवनगिर्यादीनां, नृपाणां प्रतिबोधकाः।
सर्वत्र जैनधर्मस्य, विजयं कारयन्ति ते ॥३२९॥
तन्नाम्ना चापरे जाताः, आचार्या जैनशासने।
मेदपाटनृपाणां च, तन्मध्ये बोधकश्च कः ॥३३०॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

अतस्तन्निर्णयो नैव, जातोऽद्यावधि शासने ।
ऐतिहासिकसामग्र्याः, अभावे निर्णयो न हि ३३१
सूरयो मानदेवाख्याः, तत्पट्टे चागतः खलु ।
ततो विमलचन्द्राख्याः, सूरयः पट्टदीपकाः ॥३३२॥
तत्पट्टं भूषयामासुः, उद्योतनाख्यसूरयः ।
वटगच्छ समुत्पत्तिः, तत एव प्रजायते ॥३३३॥
तत्स्वरूपं विशेषेण, कथ्यते ज्ञानहेतवे ।
श्रोतव्यं प्रेमभावेन, शासनोन्नतिकांक्षिभिः ३३४
पञ्चत्रिंशत्तमे पट्टे, सुधर्मस्वामिनां खलु ।
संजाताश्च महाभागाः, उद्योतनाख्य सूरयः ।३३५
मथुरा तीर्थयात्रा च, अनेकशः कृता च तैः ।
सम्मेतशिखरस्यैव, पञ्चकृत्वश्च सा कृता ॥३३६॥
एकदा खलु तीर्थानां, यात्रां कृत्वा हि चाबुदे ।
यात्रार्थं च समायाताः, तलहट्ट्याश्च नैकटे ॥३३७
टेलिग्रामस्य सीमायां, वटस्याधस्तले तदा ।
स्थिताश्च सूरयस्तत्र, विश्रामकृतिहेतवे ॥३३८॥
तत्काले सुग्रहाणां च, योगस्तु जायते महान् ।
आचार्येणैव तत्काले, चिन्तितं निजमानसे ॥३३९॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

अधुना शुभयोगानां, योगो मीलतिसर्वथा ।
शुभे लग्ने शुभं कार्यं, कर्त्तव्यमिति चिन्तितम् ३४०
सर्वदेवादिशिष्याणां, मुख्यानां च तदा खलु ।
स्वाभिप्रायं प्रदर्श्यैव, स्वकार्यंकरणोद्यता: ॥३४१॥
आचार्यपददानं च, तेषां कृतं च तत्क्षणे ।
आशीर्वादप्रदानं वै, कृतं च सूरिभिस्तदा ॥३४२
वटवृक्षसमायुष्मत्संततिः परिवर्धताम् ।
शासने सुखपूर्वेण, प्रचारः प्रविधीयताम् ॥३४३॥
तत्काले सर्वदेवानां, ख्यातिश्च वटगच्छतः ।
जैनेषु सर्वदा जाता, पश्चाच्च वनगच्छतः ॥३४४॥
वटेष्वाचार्यतादानाद्वटगच्छः प्रजायते ।
समाचार्यां न भेदोऽस्ति, निर्ग्रन्थतश्च कश्चन ३४५
अतो नामान्तरं ज्ञेयं, न तु स्वतंत्रगच्छता ।
इत्येवं सर्व ज्ञातव्वं, जैनशासनवेदिभिः ॥३४६॥
सर्वदेवाख्यसूरीणां, सन्ततिर्वटवृक्षवत् ।
प्रशाखादिस्वरूपेण, अतीव परिवर्धते ॥३४७॥
नागेन्द्रादिकगच्छानामवान्तरीय गच्छकाः ।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

अनेकशश्च संजाताः, ते॒ऽपि[1] वटे समागताः ॥३४८
वटगच्छस्य मुख्यत्वं, तत्काले परिवर्त्तते ।
चैत्यवाससमुत्पत्तिः, सजाता तस्य पूर्वतः ॥३४९॥
[2]वटशासनकाले च, परे गच्छा विनिर्गताः ।
समाचार्याः प्रभेदेन, भिन्नत्वं तत्र चागतम् ।३५०।
सर्वदेवाख्य सूरीणां, पट्टेऽभूद्देवसूरयः ।
कर्णसिंहाख्य हालारनृपस्य प्रतिबोधकाः ॥३५१॥
मालवदेशवास्तव्य, पोर्वाख्य गृहिणस्तथा ।
प्रतिबोध्य विशुद्धे च, जैनधर्मे समानीताः ॥३५२॥
प्राग्वाटजातिरूपेण, तेषां च स्थापना कृता ।
प्रभावशालिनस्ते च संजाता जगती तले ॥३५३॥
प्रसङ्गतः परेषां च, महात्मनां च वर्णनम् ।
वादिवेतालश्रीशान्तिसूरीणां च विधीयते ॥३५४॥
थारापद्राख्य गच्छीय, विजयसिंहसूरयः ।
तच्छिष्यास्ते च संजाताः चन्द्रगच्छस्य दीपकाः३५५
धनपालकवीनां च, प्रेरणाशक्तियोगतः ।
भोजराजसभायां च, दर्शयन्ति स्वशक्तिताम् ३५६

१ वटगच्छे । २ वटगच्छशासनकाले ।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

नैकवादिवराणां च, वादे जित्वा हि तत्क्षणे ।
स्वीय चमत्कृतिश्चैव, सूरिभिर्दर्शिताः खलु ।३५७
उत्तराध्ययने सूत्रे, गम्भीरार्थेन संयुता ।
न्यायगर्भितटीकाऽपि, रचिता बुद्धियोगतः ॥३५८
पाइटीकाभिधाना च, प्रसिद्धा जैनशासने ।
सप्तशतं च श्रीमालकुटुम्बानां च बोधनम् ॥३५९॥
अपूर्वशक्तियोगेन, सूरिणा च कृतं तदा ।
अतीववादशक्त्या च, भोजराजेन हर्षतः ॥३६०॥
वादिवेतालरूपश्च, दत्तोपाधिश्च तत्क्षणे ।
तत्सभायां च तैरेव, पदं कवीन्द्रनामकम् ॥३६१॥
सम्प्राप्तं विज्ञयोगेन, वादिचक्रित्वकं परम् ।
एवमनेकरूपा च पदवी तेषां च मीलिता ॥३६२॥
गूर्जराभिधभीमश्च, भोजश्च मालवाधिपः ।
सन्मानं गुरुदेवानां, कुर्वन्ति नैकरूपतः ॥३६३॥
थारापद्रीय चौहाण—जातीनां प्रतिबोधनम् ।
प्रभावशालिना तेन, सूरिणा च कृतं तदा ॥३६४॥

मलधारिअभयदेवसूरिस्वरूपम्

गौर्जरदेशवास्तव्य, कर्णदेवेन तत्क्षणे ।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

गुरुषु शुद्धचारित्रमुत्कृष्टं च तपस्तथा ॥३६५॥
दृष्ट्वा तेनैव सूरीणां, मलधारिपदार्पणम् ।
कृतं प्रसन्नरूपेण, गुणेषु पक्षपाततः ।३६६॥
कुल्पाकतीर्थयात्रां च, कृत्वैलचपुरे वरे ।
गत्वा श्रीपालराजस्य, प्रतिबोधनता कृता ॥३६७॥
मुक्तागिर्याख्य तीर्थस्य, कारिता तत्र स्थापना ।
सिरपुरेऽन्तरिक्षस्य, पार्श्वनाथप्रभोस्तथा ॥३६८॥
प्रतिष्ठाविधियोगेन, सूरिणा तेन कारिता ।
परमजैनधर्मत्वं, प्रापितं तन्नृपे तदा ॥३६९॥
मुक्तागिर्याख्य तीर्थं च, श्वेताम्बरीय सूरिभिः ।
स्थापितं हि ततो नैव, नग्नाटत्वं च तत्र वै ॥३७०॥
श्वेताम्बरीय श्राद्धानां, तत्र वसत्यभावतः ।
दिगम्बरीय-सत्ता च, संजाता तत्र तीर्थके ॥३७१॥
मूलनायकमूर्त्तिश्च, श्वेताम्बरत्व दर्शिका ।
अद्यापि विद्यते तत्र, गत्वा च दृश्यतां खलु ॥३७२।

मलधारिहेमचन्द्रपरिचयः ।

अभयदेवसूरीणां, मलधार्यभिधानताम् ।
सुशिष्या हेमचन्द्राश्च, प्रखरवादिनस्तथा ॥३७३॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

विशेषावश्यके सूत्रे, महट्टीका विनिर्मिता ।
अष्टाविंशतिसाहस्रश्लोकप्रमाणसंयुता ॥३७४॥
गम्भीरार्थेन युक्ता सा, नैकवादसमन्विता ।
गणधरादिवादाश्च, तत्रैव चिन्तिता खलु ॥३७५॥
अजयमेरुराजाऽपि, व्याख्यानं श्रोतुमिच्छया ।
प्रत्यहं देशनायां च, आगच्छति च भावतः ।३७६
भुवनपालराजेन, सूरीणामुपदेशतः ।
जैनमन्दिरपूजायै, आगतानां करो नहि ॥३७७॥
सर्वथा करमुक्ताश्च, कृतास्तेनैव श्रावकाः ।
सूरिव्याख्याप्रभावेन, जातो धर्मे च रागवान् ३७८
सौराष्ट्रराजखेंगारः, संजातः सूरिभक्तराट् ॥
शाकम्भरीयराजेन, पृथ्वीपालेन तत्क्षणे ॥३७९॥
सूरीणामुपदेशेन, जैनधर्मश्च स्वीकृतः ।
रणथम्भोरग्रामे च, कारितं जैनमन्दिरम् ॥३८०॥
सिद्धराजादि[1] राजापि, व्याख्यानश्रवणाय वै ।
आगच्छति गुरूणां च, नैकटे नैकशः खलु ॥३८१
निर्माता नैकग्रन्थानां, जेता च नैकवादिनाम् ।

---

१ *सिद्धराज जयसिंह ।*

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

शुद्धप्रभावसद्युक्ता, जयतु जैनशासने ॥३८२॥

वादिदेव परिचय।

महानैयायिकास्ते च, शासने प्रौढतार्किकाः

चतुरशीतिसाहस्रश्लोकप्रमाणतायुतः ॥३८३॥

रत्नाकरान्तस्याद्वादादिग्रन्थस्तैश्च निर्मितः।

गौर्जरेश्वरसिद्धराजस्तेषां भक्तराट् खलु ॥३८४॥

तत्सभायां च नग्नाटाः, कुमुदचन्द्रवादिनः।

वादे जित्वा च सद्युक्तया, जयध्वजः प्रवर्तितः ३८५

सांख्यदर्शनकाराणां, वादिनां तस्य संसदि।

जित्वा च धर्मवादेन, वादिसिंहपदं तथा ॥३८६॥

सम्प्राप्तं सूरिभिस्तैश्च, जैनधर्मः प्रवर्धितः।

जैनशासनशोभायाः कारकाश्च जयन्तु ते ॥३८७॥

कलिकालसर्वज्ञहेमचन्द्रपरिचयः —

सम्पूर्णे भारते तेषां, यशोगानं प्रवर्तते।

सर्वकविवरेन्द्रेषु, प्राधान्यं तेषु वर्तते ॥३८८॥

सर्वेषां ग्रन्थकर्तृणां प्राधान्यं तेषु सर्वदा।

व्याख्यानशालिनां मध्ये, मुख्यव्याख्यानकारकाः ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

कुमारपालभूपालबोधकागुरवश्च ते ।
अष्टादशसु देशेषु, अमारिपटघोषणम् ॥३६०॥
कारितमुपदेशेन, सूरिणा भूपतेः खलु ।
जन्मसफलता राज्ञां, कारिता सूरिणा तदा ॥३६१
अपूर्वविज्ञता तेषामपूर्वबुद्धिकौशलम् ।
अपूर्वा तर्कशक्तिश्च, सर्वापूर्वं च सूरिषु ॥३६२॥
व्याकरणं च लिङ्गानुशासने नैव संयुतम् ।
पादलक्षप्रमाणं च, श्लोकानां तत्र वर्तते ॥३६३॥
काव्यानुशासनं चैव, छन्दोऽनुशासनं तथा ।
वादानुशासनं तैश्च, स्वोपज्ञं च विनिर्मितम् ३६४
न्याये प्रमाणमीमांसा, सटीका तैश्च निर्मिता ।
अनेककाव्यग्रन्थाश्च, रचिता सूरिभिः खलु ॥३६५॥
प्रौढिमयोगशास्त्रं च, सटीकं वर्तते खलु ।
वीतरागमहास्तोत्रं, जैनगीतास्वरूपकम् ॥३६६॥
सार्धत्रिकोटिश्लोकानां, निर्माणं जैनशासने ।
तैरेव कारितं बुध्या, सर्वाश्चर्यविधायकम् ॥३६७॥
नैकमन्दिरनिर्माणं, प्रतिष्ठाकरणं तथा ।
अनेकतीर्थयात्रा च, संघद्वारा कृता खलु ॥३६८॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat   www.umaragyanbhandar.com

सिद्धाचलमहासंघ, कुमारपालभूभुजैः ।
अतीव भक्तियुक्तेन, निष्कासितश्च भावतः ॥३९९॥
कलिकालीय सर्वज्ञाः जयन्तु ते सूरिवराः ।
तेषां स्मरणमात्रेण, गलन्ति पापपङ्कजाः ॥४००॥
प्रसङ्गतश्च सम्प्रोक्तं, वादिवैतालकादीनाम् ।
संक्षेपेण चरित्रं च, स्वपरज्ञानहेतवे ॥४०१॥
देवसूरिप्रभूणां च, अष्टात्रिंशतिपट्टके ।
सर्वदेवाख्य सूरिश्च, तत्पट्टे च द्वितीयके ॥४०२॥
यशोभद्राख्य सूरिश्च, तत्पट्टे परिराजते ।
मुनिचन्द्राख्य सूरिश्च, तत्पट्टपरिवर्धकः ॥४०३॥
अजितदेवसूरिश्च, मुनिचन्द्रान्वये खलु ।
विजयसिंहाख्य सूरिश्च, अजितदेवपट्टके ॥४०४॥
सोमप्रभाख्य सूरिश्च, तत्पट्टपरिदीपकः ।
अनुक्रमेण ते ज्ञेयाः, सूरयो वटगच्छके ॥४०५॥
षष्ठं निर्ग्रन्थसाधूनां, तपोगच्छाभिधानकम् ।
कथं केन च सम्प्राप्तं, तत्स्वरूपं निगद्यते ॥४०६॥
सोमप्रभाख्य सूरीणां, मणिरत्नाख्य सूरयः ।
लघुभ्रातृत्वरूपेण, प्रसिद्धा जैनशासने ॥४०७॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

तच्छिष्यातीवयोग्याश्च, परं संवेगधारकाः ।
जगच्चन्द्राभिधानेन, विख्याता वीरशासने ॥४०८॥
योग्यानां योग्यतां ज्ञात्वा सोमप्रभाख्य सूरिणा ।
आचार्यत्वे नियुक्तास्ते, जगच्चन्द्राख्य सूरयः ॥
तदानिं वटगच्छेषु, क्रिया शैथिल्यमागतम् ।
तदुद्धारस्य कर्त्तव्ये, जिज्ञासा मानसे बहु ॥४१०॥
सहयोगं विना नैव, कार्यसिद्धिः प्रजायते ।
भुवनचन्द्रसूरीणां, संयोगः कार्यसाधकः ॥४११॥
तत्सहायेन तैरेव, क्रियोद्धारश्च कारितः ।
शिष्यदेवेन्द्रसूरीणां साहाय्यं परमं मतम् ॥४१२॥
शुद्धक्रियां च कुर्वन्ति, आचाम्लं च तपस्तथा ।
अभिग्रहं नवीनं च, निरन्तरं प्रजायते ॥४१३॥
अनेकाचार्यवर्यांश्च, ज्ञात्वा सवेगरूपकान् ।
तद्धस्ते सूरिभिस्तैश्च, क्रियोद्धारश्च कारितः ॥४१४
अमात्य वस्तुपालश्च, तेजपालमहाशयः ।
जैनशासनमध्ये च, पुष्पदन्तो ह्यपूर्वकौ ॥४१५॥
शत्रुंजयस्य यात्रायां, एकादशश्च च सूरयः ।
भिन्नगच्छसमुत्पन्ना, निमन्त्रिता महाशयैः ॥४१६

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

जगच्चन्द्राख्य सूरिश्च, मुख्यतया विराजते ।
अनेककार्यकर्तृत्वं, सूरिषु च निगद्यते ॥४१७॥
घोरतपस्विनस्तांश्च, परमत्यागिनस्तथा ।
मेदपाटनरेशेन, जैत्रसिंहेन तत्क्षणे ॥४१८॥
तान् दृष्ट्वा च तपा रूपं पदं तेन समर्पितम् ।
दीक्षाग्रहणकालादारभ्य कण्ठगतासुकम् ॥४१९॥
आचाम्लाख्य तपश्चर्यं, कृतं कल्याणहेतवे ।
मेदपाटनरेशश्च, जातः परमभक्तराट् ॥४२०॥
राजसभासु तैरेवः दिगम्बरीय वादिनाम् ।
द्वात्रिंशद्गणनानां च, जित्वा वादे सुयुक्तितः ॥४२१
हीरकवदभेद्यत्वाद्युक्तीनां वादकालिके ।
हीरलेति च सोपाधिः, प्राप्तश्च राजसंसदि ॥४२२॥
मेदपाटनृपाश्चैव, मन्यन्ते बहुभक्तितः ।
वटगच्छस्य सन्नाम, सूरितश्च तपोऽभिधम् ॥४२३
अद्यावधि च तन्नाम, वर्तते जैनशासने ।
उन्नतिः खलु तस्यैव, प्रतिदिनं च जायते ॥४२४॥
जगच्चन्द्राख्यसूरीणां, पट्टे देवेन्द्रसूरयः ।
महाप्रभावसद्युक्ताः, संजाता जैनशासने ॥४२५॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

कर्मग्रन्थादिशास्त्राणां, कर्त्तारो भाग्यशालिनः ।
श्रावकदिनकृत्यानां, निर्मातारश्च ते मताः ॥४२६
मेदपाटनृपाणां च, समरसिंहभूभुजाम् ।
जयतल्लाख्य देवीनां, सर्वेषां प्रतिबोधकाः ॥४२७॥
सूरीणामुपदेशेन, जयतल्लाख्य राज्ञीभिः ।
चित्रकुटीय दुर्गेषु, पार्श्वनाथस्य मन्दिरम् ॥४२८॥
निर्मापितं च भावेन, सम्यक्त्वप्राप्तिहेतवे ।
प्रतिष्ठा सूरिवर्येण, कारिता विधिपूर्वकम् ॥४२९॥
गूर्जरदेशवास्तव्य, वीरधवलभूपतेः ।
भक्तिश्च गुरुदेवानामुपर्यतीव जायते ॥४३०॥
अमात्यवस्तुपालोऽपि, जातश्च गुरुभक्तराट् ।
समरसिंहभूपालैः, सूरीणामुपदेशतः ॥४३१॥
अमारिपटहोद्घोषः, स्वराज्ये कारितो मुदा ।
अनेकधर्मकार्याणि, कृतानि गुरुबोधतः ॥४३२॥
महाप्रतापिनस्ते च, जैनशासनदीपकाः ।
जयन्तु गुरुदेवाश्च, तादृशा जगती तले ॥४३३॥
तत्पट्टे धर्मघोषाख्याः, सूरयश्च समागताः ।
मण्डपदुर्गवास्तव्य, पेथडाख्यस्य मन्त्रिणः ॥४३४

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

झांझणाख्य कुमाराणां, सूरयः प्रतिबोधकाः ।
तदुपदेशेन मंत्री च, चतुरशीति मन्दिरम् ॥४३५॥
अनेकपुस्तकागारान्, करोति भक्तिभावतः ।
प्रतिभाशालिनस्ते च, जैनशासनवर्धकाः ॥४३६॥
सोमप्रभाख्य सूरिश्च, तत्पट्टे परिराजते ।
सोमतिलकसूरिश्च, तत्पट्टे च समागतः ॥४३७॥
तत्पट्टं भूषयामासुः, देवसुन्दरसूरयः ।
अनेकग्रन्थकर्त्तारः, अनेकराजबोधकाः ॥४३८॥
सोमसुन्दरसूरिश्च, जयतु पृथिवीतले ।
देवसुन्दरसूरीणां, पट्टे सोऽपि समागतः ॥४३९॥
मुनिसुन्दरनामानः, सूरयो वीरशासने ।
तत्पट्टे च समायाताः, धर्मवृद्धिकराश्चते ॥४४०॥
अध्यात्मकल्पद्रुमादिग्रन्थानां कारकाः खलु ।
सहस्रावधिकर्त्तारः, महाप्रतापशालिनः ॥४४१॥
मुजफराख्य म्लेच्छानां, गूर्जरे च निवासिनाम् ।
उपदेशं विधायैव, धर्मप्रभावदर्शिनः ॥४४२॥

१—अवधान ।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

सुबा दफरखानानां खम्भातपुरवासिनाम् ।
प्रतिबोधनकर्त्तारः, सूरयस्ते महाशयाः ॥४४३॥
अद्भुतवादशक्तिं च, दृष्ट्वा तैर्यवनैस्तदा ।
वादिगोकुलषण्डाख्यं, पदं तत्र समर्पितम् ॥४४४॥
दक्षिणविज्ञलोकैश्च, कालीसरस्वतीनामकम् ।
पदं दत्तं गुरुभ्यश्च, सभासु सर्वसन्निधौ ॥४४५॥
शिरोहिराजद्वारा च उपदेशप्रदानतः ।
अमारिपटहोद्घोषः, दापितः स्वीय राजसु ॥४४६॥
एवमनेककार्याणां, कर्त्तृणां च प्रतापिनाम् ।
सूरीणां हि गुणानां वै स्तुतिं कर्तुं न शक्यते ॥
तत्पट्टं शोभयामासुः, रत्नशेखसूरयः ।
श्राद्धविध्यादि शास्त्राणां, कर्त्तारो जैनशासने ॥४४८
दफरखानपर्षद्यां, बांबी प्रमुखवादिभिः ।
सम्मीलय गुरुदेवानां, कालीसरस्वतीपदम् ॥४४९॥
दत्तं सद्भावपूर्वेण, सहर्षेणैव तत्क्षणे ।
स्वप्रभावश्च तत्रापि, सूरिभिः परिदर्शितः ॥४५०॥
श्राद्धप्रतिक्रमस्यैव, वृत्तिश्च रचिता शुभा ।
श्राद्धविधीय ग्रन्थस्य, वृत्तिश्च विधिकौमुदी ॥४५१

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

षडावश्यकवृत्तिश्च, चतुसहस्रश्लोकिका ।
आचारत्वप्रदीपाख्यः, ग्रन्थस्तैरेव निर्मितः ॥४५२॥
हैमव्याकरणे तैश्च, अवचूरिर्विनिर्मिता ।
प्रबोधचन्द्रवृत्तिश्च, कृतेति परिश्रूयते ॥४५३॥
लक्ष्मीसागरसूरिश्च, तत्पट्टे च समागतः ।
लघुवयसि चारित्रं, गृहीत्वा पठनं कृतम् ॥४५४॥
सिद्धान्तचर्चावार्तासु, कौशल्यं प्राप्तवान् खलु ।
गच्छभेदस्य नाशाय, करोति च परिश्रमम् ॥४५५
राजनगरश्राद्धेन, गुरूपदेशदानतः ।
ज्ञानकोशः कृतस्तेन, हस्तलिखित-पत्रके ॥४५६॥
वस्तुपालस्य रासोऽपि सूरिणा तेन निर्मितः ।
तादृशगुरुदेवाश्च, जयन्तु जैनशासने ॥४५७॥
सुमतिसाधुसूरिश्च, तत्पट्टे राजते सदा ।
हेमविमलसूरिश्च, तत्पट्टे च समागतः ॥४५८॥
सूत्रकृताङ्गसूत्रस्य, दीपिका तेन निर्मिता ।
कवित्वं गुरुदेवे च, राजते नात्रसंशयः ॥४५९॥
हेमविमलसूरीणामानन्दविमलाभिधा; ।
तत्पट्टे सूरयो ज्ञेयाः, धर्मोन्नति विधायकाः ॥४६०

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

महातपस्विनस्ते च, क्रियोद्धारस्य कारकाः ।
त्यागि चारित्रपात्रत्वं, तेषु च परिशोभते ॥४६१
तपस्त्यागप्रभावेन, सौराष्ट्रपतिना खलु ।
सुरत्राणेन सौराष्ट्रे, तद्विहारश्च याचितः ॥४६२॥
जगर्षिमुख्यसाधूनां, विहारस्तत्र जायते ।
गत्वोपदेशदानेन, प्रभावः परिदर्शितः ॥४६३॥
सूरीणामुपदेशेन, कर्माशाह्वाख्य श्रावकैः ।
शत्रुंजयस्य तीर्थस्य, उद्धारस्तैश्च कारितः ॥४६४॥
नवोपवासकं कृत्वा, अन्त्यावस्थासु सूरिभिः ।
अनशनं विधायैव, स्वर्गं गच्छन्ति शुद्धितः ॥४६५
तत्पट्टं भूषयामासुः विजयदानसूरयः ।
खरतरतपोगच्छे, प्राग्जातं वैमनस्यकम् ॥४६६॥
तत्सर्वं तन्महाभागैरन्योऽन्यसहकारतः ।
शासनवृद्धिकार्याय, विनाशितं च प्रेमतः ॥४६७॥
द्वेषोत्पादकग्रन्थाश्च, गच्छद्वयस्य सन्ति ये ।
जलाधीनाश्च ते सर्वे, कारितास्तैश्च सूरिभिः ॥
अपूर्वप्रेमवृद्धिश्च, संजाता गुरुयोगतः ।
जल्पानां सप्तकस्यैव, आज्ञा च सूरिभिः कृता ॥४६९

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

परस्परं च बन्धुत्वं, वर्धितं सूरिभिस्तदा।
जयन्तु गुरुदेवाश्च, तादृशा जैनशासने ॥४७०॥
तत्पट्टं दीपयामासुः, हीरविजयसूरयः।
लघुवयसि दीक्षां च, गृहीत्वा वीरशासने ॥४७१॥
गुर्वाज्ञां च गृहीत्वैव, देवगिरौ समागताः।
तत्रत्य विज्ञपार्श्वे च, पठनं पुष्कलं कृतम् ॥४७२॥
प्रमाणशास्त्रग्रन्थेषु, ग्रन्थाः षडदर्शनात्मकः
अधीताः स्वल्पकालेन, नव्यन्यायः कृतस्तथा ॥४७३
सामुद्रिकं च ज्योतिष्कं, साहित्ये संहिता मतिः।
नाटकशास्त्रग्रन्थाश्च, अधीताः सूरिभिस्तथा ४७४
सिद्धान्ते पूर्णयोग्यत्वं, सम्प्राप्तं गुरुयोगतः।
कर्मग्रन्थादिशास्त्राणां, ज्ञानं शुद्धं समादृतम् ४७५
यशोगानं च सूरीणां, जैनजैनेतरे तथा।
आइनेऽकबरी ग्रन्थे, अबुलफजलेन च ॥४७६।
विन्सेण्टस्मिथविज्ञैश्च, स्वग्रन्थेषु स्तुतिः कृता।
सर्वविज्ञजनैरेव, प्रशंसाऽतिकृता तदा ॥४७७॥
अपूर्वब्रह्मतेजोभिः, शुद्धपाण्डित्ययोगतः।
शुद्धचारित्रयोगेन, प्रभावः प्रसृतो महान् ॥४७८॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

सम्राडकबरस्तेषां, संजातो भक्तराट् सदा ।
धर्मोपदेशतां श्रुत्वा, कृतं कार्यमनेकधा ॥४७६॥
सूरीणामुपदेशेन, वर्षे षण्मासिकावधि ।
मांसाहारनिषेधश्च, अक्बरैः सर्वथा कृतः ॥४८०॥
निर्दोषपशुपक्षीणाममारित्वं च घोषितम् ।
शत्रुंजयादितीर्थानां, करस्तेन निषेधितः ॥४८१॥
पर्युषणादिने चैव, समस्त भारते खलु ।
मांसाहार निषेधश्च, कारितः सूरिबोधतः ॥४८२॥
साधूनां विहृतौ विघ्नं दूरीकृतं च भारते ।
सूरिषु भक्तियोगेन, उपदेशप्रभावतः ॥४८३॥
जगद्गुरुपदं तेषामर्पितं भक्तिभावतः ।
तत्सभासु च नान्येन, सम्प्राप्तं तादृशं पदम् ४८४
सर्वजनहितायैव, कार्यं कृतमनेकशः ।
तत्सर्वं परिदृष्टव्यं, सूरीश्वरा[1]ख्यग्रन्थके ॥४८५॥
शासनदीपकेनैव, विद्याविजयबन्धुना ।
लिखितं स प्रमाणेन, सर्वदेशीय युक्तितः ॥४८६॥

---

१ सूरीश्वर अने सम्राट् ग्रन्थतः ।

Shree Sudharmaswami Gyanbhandar-Umara, Surat　　www.umaragyanbhandar.com

हीरविजयसूरीणां सन्नाम भारते खलु ।
सुवर्णाक्षररूपेण, विद्यते जगती तले ॥४८७॥
महावीरप्रभूणां च, अहिंसा परिघोषणा ।
सम्पूर्णभारते चैव, प्रवर्त्तिता च सूरिणा ॥४८८॥
भारतीयाश्च राजानः, सूरीणां चरणाम्बुजे ।
अहोभाग्यं च मन्वाना, आगच्छन्ति च प्रेमतः ४८९
अपूर्वसूरीशौभाग्यमपूर्वविज्ञता तथा ।
अपूर्वः शिष्यसन्दोहोऽपूर्वं सूरिवरे खलु ॥४९०॥
रोगाक्रान्ते शरीरेऽपि, भैषज्यं नैव सेवितम् ।
धर्मध्यानं च कुर्वाणाः, सूरयश्च दिवं गताः ४९१
ऊनाख्यग्राममध्ये च, अन्त्या सर्वा क्रिया तदा ।
कृता श्राद्धेन भावेन, सशोकेनैव तत्क्षणे ॥४९२॥
तत्पट्टं भूषयामासुः, विजयसेनसूरयः ।
प्रभावशालिनस्तेऽपि, धर्मप्रभावकारकाः ॥४९३॥
सूबानां खानखानानामुपदेशस्यदापनम् ।
तद् द्वारानेककार्यं च, कारितं सेनसूरिणा ॥४९४॥
गुरूणां वृद्धभावे च, देशना श्रवणाय च ।
विजयसेनसूरीणामाह्वानमकबरैः कृतम् ॥४९५॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

सूरिभिस्तत्र गत्वैव, लाहोराभिधग्रामके ।
प्रबला देशनाद्वारा, प्रभावोऽपि प्रदर्शितः ॥४९६॥
भूषणाख्यैश्च नग्नाटैः, चिन्तामणेश्च सम्मुखे ।
सूरते च कृतो वादः, तेषां निरूत्तरी कृता ॥४९७
योगशास्त्रस्य चाद्यैकश्लोकस्य बुद्धियोगतः ।
पञ्चाधिकशतार्थाहि, कृताश्च सूरिभिः खलु ॥४९८
सुमित्ररासग्रन्थश्च, सूरिभिर्निर्मितस्तदा ।
चतुर्लक्षप्रभूणां च, मूर्त्तीनां शुभयोगतः ॥४९९॥
प्रतिष्ठा च कृता तैर्हि, यात्राऽपि प्रचुरास्तथा ।
कालीसरस्वतीरूपं, पदं प्राप्तं च तैः खलु ॥५००॥
सम्राडकबरैस्तेषां, दत्तं विशुद्धप्रेमतः ।
जयन्तु सूरयस्तेऽत्र, भारते जैनशासने ॥५०१॥
कादम्बर्याख्य साहित्ये, स्फुटा टीका च निर्मिता ।
भानुसिद्धीन्दुविज्ञाभ्यां[१], बुद्धिचातुर्ययोगतः ॥५०२॥
विजयहीरसूरीणां, विज्ञान्तेवासिनः समे ।
सर्वे च ग्रन्थकर्त्तारः, सर्वे सिद्धान्तपारगाः ॥५०३॥

१—भानुचन्द्रसिद्धिचन्द्राभ्यां ।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

तत्पट्टं दीपयामासुः, विजयदेवसूरयः ।
मण्डपदुर्गमध्ये च, तेषामामन्त्रणं भवेत् ॥५०४॥
जहांगिरेण सम्राजा, आहूय देशना श्रुता ।
महातपापदं तेन, अर्पितं बहुहर्षतः ॥५०५॥
जगतसिंहराणानां, योगेन ह्युदयेपुरे ।
धर्मोपदेशकं दत्वा, अहिंसा च प्रवर्तिता ॥५०६
महाभागाश्च ते ज्ञेया, शुद्धधर्मोपदेशकाः ।
जयन्तु भारते ते च, जैनशासनवर्धकाः ॥५०७॥
तत्कालीन महाभागाः, यशोविजयविज्ञकाः ।
अपूर्वप्रतिभा युक्ताः, महाप्रतापशालिनः ॥५०८॥
अपूर्वयोगिनस्ते च, अपूर्वत्यागिनस्तथा ।
अपूर्वशक्तियुक्ताश्च, सर्वापूर्वसमन्विताः ॥५०९॥
द्वितीय हरिभद्राश्च, अवतीर्णाः क्षमातले ।
यादृशी प्रतिभा तेषां, नान्यत्र तादृशी खलु ॥५१०
प्रौढयुक्तिभृतास्तेषां, ग्रन्थाश्च जैनशासने ।
सर्वविषयशास्त्राणि, कृतानि तर्कशैलितः ॥५११
तत्समं नैव पाण्डित्यं तत्काले नैव भारते ।
तादृशा जैनध च, न सन्ति पण्डिता खलु ॥५१२

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

संस्कृते प्राकृते चैव, गौर्जरे मरुदेशीये ।
भाषावादे च ग्रन्था स्युरनेके जैनशासने ॥५१३॥
काश्यां द्वादशवर्षान्तं, स्थित्वा दर्शनशास्त्रकम् ।
नव्यप्राचीनग्रन्थाश्च, अधीता गुरुयोगतः ॥५१४॥
वादविषयशक्तिश्च, काश्यां प्रौढाश्च दर्शिता ।
न्यायविशारदं चैव, पदं प्राप्तं च तत्र वै ॥५१५॥
रहस्यपदयुक्तानां, अष्टाधिकशतं खलु ।
ग्रन्थाश्च निर्मितास्तैश्च, प्रौढयुक्तिसमन्विताः ॥५१६
अपूर्वतत्त्वचर्चा च, अपूर्वबुद्धियोगतः ।
अनेकवादग्रन्थाश्च, रचितास्तैर्महात्मभिः ॥५१७॥
सर्वविषयसाहित्यं, निर्मितं प्रौढयुक्तितः ।
जैनशासनधूर्ग च, ऊढा तेन महात्मना ॥५१८॥
जैनदर्शनमध्ये च, तत्समा नैव साधवः ।
विद्यन्ते विज्ञवर्याश्च, अतो धन्याश्च ते खलु ॥
दिगम्बरादियुक्तीनां, खण्डनं विहितं महत् ।
अध्यात्ममतशास्त्रे च, दृश्यतां तत्त्वकांक्षिभिः ॥
तादृशाः साधवश्चैव, जयन्तु जगती तले ।
अस्माकं वन्दनं तेषां, भवतु च पुनः पुनः ॥५२१॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

विजयसिंहसूरिश्च, विजयदेवपट्टके ।
क्रमेणैव समायातः, वीरधर्मस्य शासने ॥५२२॥
तदानिं च क्रिया काण्डे, शैथिल्यं हि प्रवेशितम् ।
तन्निराशाय यत्नोऽपि, सत्यविजयसाधुभिः ॥५२३
क्रियोद्धारस्य कार्येषु, नैकसाधुसमागताः ।
आत्मकल्याणकर्त्तव्ये, केषामिच्छा न जायते ॥५२४
वैरागी महातपस्वी च, सत्यविजयसाधुराट् ।
अपरसाधुसाहाय्यात्क्रियोद्धारश्च कारितः ॥५२५॥
ततः संवेगि नाम्ना च, आत्मार्थिनश्च साधवः ।
जैनशासनमध्ये च, विख्याता धर्मयोगतः ॥५२६॥
कर्पूरविजयश्चैव, तत्पट्टे परिराजते ।
क्षमाविजयसाधुश्च, ज्ञातव्यस्तदनन्तरम् ॥५२७॥
जिनविजयभव्यात्मा, ततोऽनुराजते खलु ।
तपोगच्छे च विख्यातः जयतु भुवि मण्डले ॥५२८
उत्तमविजयस्तस्मात्पद्मविजयपण्डिताः ।
रूपविजयसाधुश्च, कीर्त्तिविजयसाधुराट् ॥५२९॥
कस्तूरविजया ज्ञेयाः, पूज्याश्च भाग्यशालिनः ।
मणिविजयसौभाग्यं, वर्तते सर्वसाधुषु ॥५३०॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

महायोगित्वरूपेण, प्रसिद्धाः शक्तिशालिनः ।
जगत्पूज्या महाभागाः, मणिविजयसाधवः ॥५३१
अशीतिषटशतं तेषां, शिष्यप्रशिष्यरूपतः ।
विद्यन्ते साधवश्चैव, चिन्तामणिस्वरूपकाः ॥५३२।
तपोगच्छेषु ते ज्ञेया, सर्वेषां गुरवः खलु ।
संविज्ञेषु शिरोभूताः, जयन्तु गुरवः सदा ॥५३३॥
बुद्धिविजयशिष्याश्च, मुख्यास्तेषां च सम्मताः ।
दुलवाग्रामसंजाताः, पाञ्चालदेशमध्यके ॥५३४॥
टेकसिंहपितुर्नाम, कर्मादे मातृनामकम् ।
बटेलसिंह तन्नाम, प्राक्काले गुरूणां मतम् ॥५३५॥
संवेगि शुद्धसाधूनां, तद्देशे विरहो महान् ।
अतो लुम्पकसाधूनां, दीक्षां पार्श्वेऽगृहीत्तदा ।५३६
बुटेरायश्च तन्नाम, ढंढकेन नियोजितम् ।
जिनागमविलोकेन, जिनपूजां विलोकिता ॥५३७॥
गुरुपार्श्वे च सम्प्रोक्तं, कथं मूर्त्तिर्न मन्यते ।
सूत्रेषु बहवः पाठाः, विद्यन्ते च पदे पदे ॥५३८॥
गुरुणा क्रोधदृष्ट्या च, पूजा प्रोक्ता न कुत्रचित् ।
इत्युक्ते गुरुणा पाठाः, दर्शिता गुरुसम्मुखे ॥५३९॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

मूलचन्द्रेण तत्काले, दीक्षा च गुरुसंनिधौ।
गृहीता भक्तिभावेन, ततो जाताः सहायकाः ॥
गुरुपार्श्वे च तत्पाठाः, दृष्टा यदा च तेन वै।
मूलचन्द्रमहाराजै, गुरूणाँ कथितं तदा ॥५४१॥
दाक्षिण्यं नैव कर्त्तव्यं, त्यज्यतां मुखवस्त्रिका
सदा मुखेषु पाटाश्च, अश्वानामेव शोभते ॥५४२
प्रत्युताऽसंख्यजीवानां, हिंसा च जायते ध्रुवम्।
तस्याश्च त्रोटनं श्रेष्टं, इत्युक्त्वा तैश्च त्रोटिता ॥
कृपाराममहाभागाः, शुद्धवैराग्यमूर्त्तयः।
आत्मकल्याणकर्त्तव्ये, गुरून् गवेषयन्तिते ॥५४४॥
मातुलमूलचन्द्राणां, योगश्च मीलितस्तदा।
तद् गुरुनिकटे तैश्चा, दीक्षा च स्वीकृता शुभा ॥
वृद्धिचन्द्रं च तन्नाम, योजितं गुरुणा तदा।
ततः पाञ्चालदेशेषु, मूर्त्तिपूजोपदेशनम् ॥५४६॥
विशुद्धश्रावका नैके, संजाताश्चोपदेशतः।
विहृत्य तैर्महाभागैः, शुद्धधर्मश्च दर्शितः ॥५४७॥
सिद्धाचलस्य यात्रायै ततश्च साधवस्त्रयः।
यात्रां कृत्वा चतुर्मासं, कृतं भावपुरे वरे ॥५४८॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

राजनगरमध्ये च, आगत्यैव ततः परम् ।
मणिविजयपार्श्वे च, शुद्धदीक्षा च याचिता ॥५४६
संवेगि साधवो जाताः, त्रयोऽपि गुरुसामीपे ।
बुटेरायस्य सन्नाम, बुद्धिविजयरूपकम् ॥५५०॥
मुक्तिविजयसन्नाम, मूलचन्द्रस्य स्थापितम् ।
वृद्धिविजयरूपं च, वृद्धिचन्द्रस्य योजितम् ॥५५१॥
शिष्यौ तौ द्वौ च संजातौ बुद्धिविजययोगिनां ।
परं संवेगतां प्राप्य, हर्षितौ तौ महाशयौ ॥५५२।
आत्मारामादि पूज्यैश्च, पश्चात्पाञ्चालमध्यके ।
शुद्धधर्मप्रचारश्च, विहितः पुष्कलस्तदा ॥५५३॥
अष्टादशमहाभागैः, साधुभिः सह तत्र वै ।
आत्मारामैश्च पाटानां, त्रोटनं च कृतं महत् ५५४
गूर्जरदेशमध्ये च, आगतास्ते महाशयाः ।
बुटेरायगुरूणां च, दीक्षां पार्श्वेऽगृहीत्तदा ॥५५५
शुद्धसंवेगिनो जाताः, परमवैराग्यमूर्त्तयः ।
शुद्धधर्मप्रचाराय, गुरूणां ते सहायकाः ॥५५६॥
नीतिविजयपूज्याश्च, क्षान्तिविजयसाधवः ।
बुद्धिविजयसाधूनां, शिष्याश्च ते समे मताः ॥५५७

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

संवेगिसाधवश्चैव, अतोवृद्धिं गताः खलु ।
प्रचारकार्यकर्त्तव्ये, सर्वे ते च सहायकाः ॥५५८॥
विजयानन्द सूरीणां, पांचालश्च प्रदेशकः ।
शुद्धश्रद्धाप्रवेशाय, अर्पितो गुरुभिस्तदा ॥५५९॥
पूज्यानां मूलचन्द्राणां, राजनगरमध्यके ।
प्रचारो विहितः शुभ्रः, आशातीतश्च तत्क्षणे ।५६०
पूज्यानां वृद्धिचन्द्राणां, काठियावाडमध्यके ।
अनेकधा प्रचारस्य, कार्यं च विहितं शुभम् ॥५६१॥
नीतिविजयपूज्यैश्च, सुरतादिप्रदेशके ।
धर्मप्रचारकार्यं च, कृतं शासनरागतः ॥५६२॥
क्षान्तिविजयसत्साधुः, महातपोविधायकः ।
वैराग्यपुष्टिव्याख्याभिः, प्रचारः कृतवान् खलु ५६३
तदा सुसंपशान्तिश्च, अपूर्वा परिदृश्यते ।
अपूर्वबन्धुभावत्वं, परस्परं प्रजायते ॥५६४॥
साहित्यवृद्धिकार्यं च, साधुभिश्च कृतं तदा ।
नूतनग्रन्थनिर्माणं, विजयानन्दसूरिभिः ॥५६५॥
प्रज्ञापनाऽऽख्यसूत्रस्य, टीप्पनं वृद्धिचन्द्रकैः ।
पूज्यैश्च विहितं ज्ञेयं, स्वाध्यायो विहितो महान् ५६६

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

परिचयो विशेषेण, वृद्धिचन्द्रमहात्मनाम् ।
कार्यते सुखबोधाय, शान्तिसाम्राज्यसिद्धये ॥५६७
जगद्गुरुत्वयोग्यत्वं, दृश्यते पादपंकजे ।
शान्तरसमयीमूर्त्तिः, तेषां च प्रविलोक्यते ॥५६८
साधूनां शान्तिदातारः, पक्षपातविवर्जिताः ।
गुणज्ञा गुणद्रष्टारः, दृश्यन्ते नैव तादृशाः ॥५६९॥
क्रोधस्यावसरो नैव, तेषां पार्श्वे च कर्हिचित् ।
देवाणुप्रियशब्देन, मुनीन् जल्पन्ति सर्वदा ॥५७०॥
साधुजीवनपर्यन्तं, मिथ्यादुष्कृतकस्य वै ।
दातव्येऽवसरो नैव, तेषां कदापि जायते ॥५७१॥
विचार्यशुद्धवक्तारः, कुर्वन्ति नैव चापलम् ।
हितमितादिशब्देन, युक्तं जल्पन्ति ते तथा ५७२
तत्काले सर्वसाधूनामाधिपत्यं च राजते ।
क्लेशवार्ता न कर्हिचित्तत्समीपे भवेत् खलु ॥५७३॥
महाक्रोधिमनुष्याश्च, यदाऽऽगच्छन्ति नैकटे ।
शान्तमूर्त्तिं च तं दृष्ट्वा, तेऽपि गच्छन्ति शान्तिताम्
तख्तसिंहाख्यभूपाला, आगत्य गुरुसन्निधौ ।
एकदा तेऽपि जल्पन्ति, दृष्ट्वा च पादपंकजम् ५७५

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

भवतां चेन्न दीक्षा स्यात् संसारे भूपतिस्तदा ।
अहो गुरुषु सौभाग्यं, अद्भुतं परिदृश्यते ॥५७६॥
साधूनां पाठनं सम्यग्देशना मेघगम्भीरा ।
व्याख्याशैली हि चापूर्वा, गुरुषु विद्यते सदा ५७७
शिष्यसन्दोहबाहुल्यं, प्रज्ञाशक्तिसमन्वितम् ।
तादृशं नैव केषाञ्चिद्यादृशं विद्यते गुरौ ॥५७८॥
विद्वत्ता खलु चाद्यापि, गुरूणां समुदायके ।
अन्येषां समुदायेषु, तादृशी नैव विद्यते ॥५७९॥
एकादशसु शिष्येषु, मध्ये द्वौ श्रेष्ठपण्डितौ ।
वादिशिरोमणी तौ च, महाप्रभावशालिनौ ॥५८०
प्रथमो हि गुरुदेवः स्यान्नेमिसूरिर्द्वितीयकः ।
स्वपरशास्त्रज्ञातारौ, सिद्धान्तेषु महोदधी ॥५८१॥
परे सिद्धान्तज्ञातारः, स्वात्मीयधर्मपोषकाः ।
गम्भीरविजयाद्याश्च, संस्कृतग्रन्थकारकाः ॥५८२॥
केवलविजयाश्चाद्याः, वैराग्यरसपोषकाः ।
भद्रभावेन संयुक्ताः, साधुद्वयसमन्विताः ॥५८३॥
गम्भीरविजयानां च, साधवः सप्तसंख्यकाः ।
स्वयं पण्डितवर्याश्च, सिद्धान्तपारगामिनः ॥५८४॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

उत्तमविजया ज्ञेयाः, उत्तमधर्मदेशकाः ।
साधुत्रयसमायुक्ताः, गुरुभक्तिपरायणाः ॥५८५॥
चतुरविजयाः पूज्याः, शान्तस्वभावताजुषः ।
वैराग्यरसतायुक्ताः, जैनसिद्धान्तज्ञायकाः ॥५८६॥
द्वादशसाधुसंयुक्ताः, तपोधर्मप्रदर्शकाः ।
आत्मकल्याणमार्गेषु, विचरन्ति च ते सदा ॥५८८॥
राजविजयपूज्याश्च, सदा वैराग्यदीपकाः ।
भावविजयसाधुश्च, तपस्विनां शिरोमणिः ॥५८८॥
हेमविजयसाधूनाममोघधर्मदेशना ।
वैराग्यवासनारूपा, दससंख्याकसाधवः ॥५८९॥
विजयनेमिसूरीणां, षष्टिसंख्याकसाधवः ।
अनेके पण्डितास्तेषु, अनेके ग्रन्थलेखकाः ॥५९०॥
प्रेमविजयसाधूनां, शिष्यत्रयी च वर्तते ।
अपूर्वप्रेमभावश्च, विद्यते च महात्मनाम् ॥५९१॥
शान्तमूर्त्तिस्वरूपेण, कर्पूरविजयस्य वै ।
ख्यातिश्च जैनधर्मेषु, अपूर्वत्यागभावतः ॥५९२॥
साधूनां सप्तसंख्याः स्याद्भाषाग्रन्थस्य लेखकाः ।
प्राचीनपुस्तकानां च, ते स्वयमनुवादकाः ॥५९३॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

वृद्धिचन्द्रगुरूणां च, अतीव प्रेमपात्रता ।
सम्पादिता च यैरेव, तेषां च शिष्यसम्पदा ॥५६४॥
विशेषरूपतश्चैव, निगद्यते प्रसङ्गतः ।
सर्वदिग्गामिनः शिष्याः, परेषां नैव सन्ति वै ५६५॥
विजयधर्मसूरीणां, गुरूणां किमु कथ्यते ।
वर्णनं तद्गुणानां च, जैनजैनेतरैः कृतम् ॥५६६॥
षोडशभिन्नभाषायां, गुरूणां जीवनं खलु ।
विभिन्नदेशविज्ञैश्च, लिखितं स्वीयभक्तितः ५६७॥
प्रौढजीवनवादश्च, संस्कृते प्राकृते च वै ।
मंगलविजयाद्यैश्च, साधुभिश्च विनिर्मितः ॥५६८॥
गौर्जर्यां चैव भाषायां, गद्यपद्यात्मकानि च ।
निर्मिताऽनेकरूपाणि, विद्यन्ते जीवनानि च ॥५६९॥
आदर्शसाधुग्रन्थानां, हिन्दीभाषासु निर्मितिः ।
फ्रान्चेटलीयभाषायां, जीवनं विद्यते तथा ॥६००॥
आङ्गलसिंहलीयासु, भाषासु नैकजीवनम् ॥
लिखितं विभिन्नविज्ञैश्च, सर्वेषां बोधहेतवे ॥६०१॥
महाराष्ट्रीयभाषायां, कन्नडासु तथैव च ।
षड्भाषायां च ग्रंथोऽपि लिखितः साधुभिः[१] खलु ॥

१—व्या० सा० तीर्थ तर्कालङ्काराहिमांशुविजयैः ।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

इत्येवं भिन्नभाषायां, विज्ञैश्च भक्तिभावतः ।
जीवनं लिखितं ज्ञेयं दृश्यतां सर्वसज्जनैः ॥६०३॥
शिष्याश्च प्रौढविद्वांसः, सर्वदेशविहारिणः ।
सर्वदेशीयभाषायां, विज्ञाश्च परिकीर्त्तिताः ॥६०४॥
शासनरागरक्ताश्च, शुद्धचारित्रपालकाः ।
वादिशिरोमणीभूताः, वीरशासनपोषकाः ॥६०५॥
विजयेन्द्राऽऽख्यसूरिश्च, मुख्यशिष्यश्च सम्मतः ।
इतिहासादिशास्त्रेषु, पाण्डित्यं परिवर्तते ॥६०६॥
अनेक ग्रन्थकर्त्तृत्वं, भिन्नभाषासु ज्ञायताम् ।
पञ्चशिष्यस्य सम्पत्तिः, सूरीणां परिजायते ॥६०७॥
मङ्गलविजयश्चैव, द्वितीयः परिकीर्त्तितः ।
पाठकपदसंयुक्तः, न्यायतीर्थविशारदः ॥६०८॥
अनेकग्रन्थकर्त्ता च, भाषायां संस्कृते तथा ।
प्रभाकरेण संयुक्तः, नैकदेशेविहारवान् ॥६०९॥
सम्मेतशिखरादीनां, तीर्थानां समुद्धारकः ।
बङ्गे सराकजातीनामुद्धारे च समुद्यतः ॥६१०॥
शिष्योऽपि तादृशस्तस्य, सर्वकार्यसहायकः ।
गुरुषु भक्तिरागश्च, सर्वदा परिदर्शकः ॥६११॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

कीर्त्तिविजयश्चैव, सिद्धान्तपरिपाठकः ।
स्वाध्यायध्यानकर्त्ता च, श्रावकान् प्रतिबोधकः ॥
रत्नविजययोगीन्द्रः, योगकार्ये सदा रतः ।
ग्रन्थपञ्चविनिर्माता, शुद्धचारित्रपालकः ॥६१३॥
भक्तिविजयपंन्यासः जैनसिद्धान्तज्ञायकः ।
त्रिंशच्चशिष्यसंयुक्तः, गौर्जरे च विहारवान् ॥
सिंहविजयसाधुश्च, आत्मधर्मगवेषकः ।
कर्मग्रन्थादिशास्त्राणामभ्यासी सर्वदा खलु ॥६१५॥
विद्याविजयसत्साधुः, जैनशासनदीपकः ।
व्याख्यानवारिधिश्चैव, जैनसाहित्यलेखकः ॥६१६॥
अनेकग्रन्थनिर्माता, ग्रन्थाश्च सर्वदेशीयाः ।
पञ्चविंशतिसंख्याकाः, ग्रन्थानां निर्मितीकृताः ॥
शिष्योऽपि तादृशो ज्ञेयः सर्वदर्शनज्ञायकः ।
ग्रन्थपञ्चककर्त्तृत्वं, तस्मिंश्च विद्यते खलु ॥६१८॥
न्यायविजयसाधुश्च, महाविज्ञश्च सम्मतः ।
प्रखरतार्किकः सोऽपि, प्रौढग्रन्थविधायकः ॥३१६॥
अपूर्वा प्रतिभा तस्य, व्याख्यानकारको महान् ।
शुद्धसांत्वनशक्तिश्च, तत्रैव विद्यते तथा ॥६२०॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

महेन्द्रविजयश्चैव, शुद्धचारित्रपालकः ।
ज्ञानध्यानसमायुक्तः, भक्तिभावसमन्वितः ॥६२१॥
गुणविजयसाधुश्च, चारित्रे दृढरागवान् ।
गुरुभक्तिसमायुक्तः, त्यागभावेषु तत्परः ॥६२२॥
जयन्तविजयश्चैव, शान्तमूर्त्तिः प्रसिद्धभाक् ।
वैराग्यवासनायुक्तः, क्रियासु कर्मठः सदा ॥६२३॥
प्राचीनतत्त्ववेत्ता च, ग्रन्थसप्तककारकः ।
शिष्योऽपि गुरुभक्तश्च, सोऽपि ग्रन्थविधायकः ॥
देवेन्द्रविजयः साधुः स्पष्टवक्ता निगद्यते ।
चारित्रगुणरक्तः स्याद् गुरुध्यानपरायणः ॥६२५॥
धरणेन्द्राख्यसाधुश्च, भजनानन्दकारकः ।
गौर्जरे विहृतिस्तस्य, क्रियाकाण्डेषु तत्परः ॥६२६
इत्येवं शिष्यसम्पत्तिः, गुरूणां परिजायते ।
प्रशिष्या नैकसंख्याकाः, वीरशासनसम्मताः ॥
प्रशस्तिकारकेनापि, जैनतत्त्वप्रदीपकम् ।
व्युत्पत्तिवादटीका च, शक्तिवादस्य टीप्पणम् ॥
नयप्रदीपग्रन्थश्च, व्याकृतिधर्मदीपिका[1] ।
योगप्रदीपशास्त्रं च, योगस्य प्रतिपादकम् ॥६२९॥

---

१ धर्मदीपिका व्याकरणम्

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

आदर्शभूतिनामाख्यं, गुरुदेवस्य जीवनम् ।
वीरपट्टावलिश्चैव, प्रशस्तिरूपतः खलु ॥६३०॥
नवसंख्याकग्रन्थाश्च, संस्कृते निर्मितास्तथा ।
हिन्दीभाषासु चैकः स्यात् पदार्थव्यवस्थापकः ॥६३१
तत्त्वाख्यानस्य द्वौ भागौ, पूर्वोत्तरार्द्ध भेदतः ।
षड्दर्शनस्य तत्त्वानां, समालोचकतायुतौ ॥६३२
आदर्शदीपिका साऽपि, जैनतत्त्वनिरूपिका ।
विस्तृतरूपतः सर्वतत्त्वानां परिदर्शिका ॥६३३॥
सप्तभङ्गी प्रदीपश्च, सप्तभङ्गप्ररूपकः ।
स्याद्वादापूर्वशैली च, दर्शकः सोऽपि सम्मतः ॥६३४
द्रव्यप्रदीपग्रन्थे च, षड्द्रव्यस्य प्ररूपणम् ।
श्रद्धाप्रदीपग्रन्थे च, सम्यक्त्वप्रतिपादनम् ॥६३५॥
धर्मजीवनदीपे च, गुरूणां रासरूपतः ।
चरित्रं लिखितं तत्र, विज्ञेयं धर्मकांक्षिभिः ॥६३६॥
धर्मप्रदीपग्रन्थेषु, स्तवनानां निरूपणम् ।
अध्यात्मरूपतो ज्ञेयं, भिन्नविषयकं तथा ॥६३७॥
गहूंलीसंग्रहश्चैव, गुरुस्तुतिनिरूपकः ।
आन्ध्रदेशीय[1]भाषासु, व्याकृतिकोषनिर्मितिः ॥६३८

---

1 तेलुगुभाषासु

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

लुम्पकमतदीपाख्य[1], मूर्त्तिमण्डनरूपकः ।
मुखे च वस्त्रिकायाश्च, बन्धनस्य निषेधकः ॥६३९॥
ग्रन्थानां विंशतिसंख्या, कृता प्रशस्तिकारकैः ।
द्रव्यानुयोगपूर्णत्वं, दृश्यते च पदे पदे ॥६४०॥
न्यायशैलीधृता तत्र, युक्तिशून्यं च नो भवेत् ।
सर्वेषां सुखबोधाय, निर्मिता शुद्धभावतः ॥६४१॥
योगप्रदीपशास्त्रेषु, वीरपट्टावलौ तथा ।
यदशुद्धं च ज्ञातं स्याद्विशोध्य परिदृश्यताम् ६४२।
शास्त्रविरुद्धदोषश्चेत् प्रमादप्रेषदोषतः ।
स्खलना यदि चेत्तर्हि, मिथ्यादुष्कृतता भवेत् ॥६४३
गुप्तिनवनिधानेन, नवधा ब्रह्मचर्यकैः ।
युक्ते खे वत्सरे वीरविभोः कैवल्यस्थानके ॥६४४॥
माघशुक्लद्वितीयायां, योगप्रदीपशास्त्रके ।
ग्रन्थान्ते च कृता ज्ञेया, प्रशस्तिर्वीरशासने ॥६४५॥
गौर्जराभिधदेशेषु, वटपद्रीयराज्यके ।
लींचग्रामे समुत्पन्नैः, मङ्गलविजयैः कृतः ॥६४६॥
योगप्रदीपग्रन्थश्च, निर्मितो ज्ञानहेतवे ।
तत्समासौ समासिश्च, ग्रन्थस्य परिज्ञायताम् ॥६४७॥

---

[1] ढुंढकमतप्रदीप ।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

इति

शास्त्रविशारदजैनाचार्यजङ्गमयुगप्रधानजगत्पूज्य

श्रीविजयधर्मसूरीश्वरशिष्येण न्यायविशारद-

न्यायतीर्थोपाध्यायमङ्गलविजयेन विरचिते

योगप्रदीपग्रन्थे भगवत्सुधर्मस्वामित

आरभ्य गुरुदेवशिष्यप्रशिष्यपर्यन्त-

वर्णनाऽऽख्यवीरधर्मपट्टावलि रूपा

प्रशस्तिः समाप्ता । तत्समाप्तौ-

च ग्रन्थसमाप्तिः प्रजायते ॥

॥ ॐ शान्तिः शान्तिः ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

श्री

पु

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com